
अथाषाढमासमाहात्म्यं प्रारभ्यते.


शंकर
पद्मुख
ब्रह्मदेव
नारद
स्त्री
पक्षिगण
नदी
ब्रा०
ब्राह्मण
तापी
नदी
नहुषराजा
वसिष्ठ
धनुर्धरी
कामकुंभेश्वर
ब्राह्मण
भिल्ल
मृग
पद्मकौशल
स्वरकौशल
बालक
स्त्री

अथ आषाढमाहात्म्यस्य विषयानुक्रमणिका.

अध्याय.	विषय.
१	कार्तिकेयस्य शंकरंप्रति आषाढमाहात्म्यविषये प्रश्नः कार्तिकेयेनपृष्टस्य शंकरस्य आषाढमाहात्म्य प्रस्तावपूर्विका उक्तिः तत्प्रसंगात् तापीमाहात्म्यकथनं ताप्यवमानिताया भागीरथ्या ब्रह्मसमीपेगमनम् श्लोकाः २६
२	ब्रह्मण आदेशान्नारदकृतस्तापीमाहात्म्यापहारः तज्जन्यपातकेन नारदस्याज्ञानप्राप्तिः नारदस्य ब्रह्मसमीपेगमनं स्ववृत्तकथनंच, ब्रह्मकृता तापीस्तुतिः तथाप्रसन्न यानाप्याकृता नारदाज्ञाननिवृत्तिः, आषाढमासे तवमाहात्म्यमतीवस्यादिति ब्रह्मदत्त स्तापीप्रतिवरः श्लोकाः २६
३	आषाढमासेतापीस्नान माहात्म्यकथनं तत्प्रसंगेन एकस्य वणिजःकथा. तापीजले मग्नोस्थितस्य वणिजः अंगलग्नजलबिंदुस्पर्शात्तत् पितृमुक्तिः श्लोकाः १६
४	ममैनेपितर इत्यजानतोवणिजः स्वपितॄनप्रति केयूयमित्यादिप्रश्नः पृष्टानांतेषां स्ववृत्तकथनम्. श्लोकाः २१
५	कथाप्रसंगेन वणिक्पितृभिःकृतो ब्राह्मणकथा प्रस्तावः श्लोकाः ३३
६	प्रस्तुत ब्राह्मणस्या आषाढमासे तापीप्रति गमनं, कालयोगात् तत्पुत्रस्यापितत्रागमनं पुत्रदत्तात् आषाढस्नानपुण्यात् ब्राह्मणस्योद्धारः
७	अस्माकमयं पुत्रइत्यजानतांपितॄणांपुत्रंप्रतिकस्त्वमित्यादिप्रश्नः वणिक्कृतं स्ववृत्तकथनं. तेन आषाढस्नानपुण्यं दत्वा पूतानांतेषामुत्तमलोकप्राप्तिः श्लोकाः ११
८	आषाढमासे तापीस्नानं केनविधिनाकार्यं इत्यादिः कार्तिकेयंकृतः शंकरप्रतिप्रश्नः पृष्टेनशंकरेणकृतं आषाढमाहात्म्यादिकथनं श्लोकाः ४३
९	आषाढमासे गोदानादि माहात्म्य कथनं. श्लोकाः २२
१०	गृहादिदानमाहात्म्यकथनम्. श्लोकाः २३
११	आषाढमासे तापीस्नानमाहात्म्यवर्णनं तत्रिये येनदुष्षराजकथारंभः श्लोकाः १७
१२	पूर्वारब्ध नहुषराजकथाप्रसंगेनशतबलिराजेतिहासकथनं द्वादशाध्यायमारभ्य एकोनविंशोध्यायसमाप्ति पर्यंतं. तत्र पुनः पुनः तापी-

अथ आषाढमाहात्म्यस्य विषयानुक्रमणिका॰

अध्याय॰	विषय॰	अध्याय॰	विषय॰	अध्याय॰	विषय॰
	स्नानमाहात्म्यकथनम् क्रमेणश्लोकाः १९। ४४। २१। २०। ४०। २१। २८। २५		पिंडदानादि माहात्म्यकथनम् चतुर्विंशाध्यायसप्तमि पर्यंतं क्रमेण श्लोकाः ३४। २७। ३२। ४५		भ्य एकोनत्रिंशाध्याय पर्यंतं एकोनत्रिंशाध्याये आषाढमाहात्म्यकथा संपूर्तिश्च क्रमेणश्लोकाः १५। ४१। २२। २१। ३०
२०	तापीस्नानमाहात्म्यकथन प्रसंगेन पक्षकीतस्वरकीतारव्यान कथनम्॰ श्लोकाः २९	२५	आषाढे तापीमाहात्म्यकथन प्रसंगेन लांगलवर्धनेति हास कथनम्॰ पंचविंशाध्याय मार		इतिआषाढमाहात्म्यानुक्रमणिकास॰
२१	पूर्वारव्यारव्यानकथनम्॰ तस्मिन् ताप्यांश्राद्ध				

इति आषाढमाहात्म्यस्य विषयानुक्रमणिका समाप्ता॰

श्रीगणेशायनमः श्रीसरस्वत्यैनमः श्रीगोपालकृष्णायनमः नारायणंनमस्कृत्यनरंचैवनरोत्तमम् देवींसरस्वतीव्यासंत
तोजयमुदीरयेत् १ स्कंदउवाच संतिताप्तीतटेयानितीर्थान्यत्रमहांत्यपि श्रुतानितानिसर्वाणिसर्वपापहराणिच
१ अधुनाश्रोतुमिच्छामियदाषाढफलंलभेत् तापसस्नानकर्तृणांतत्तातनिखिलंवद २ आषाढस्नानमहिमाकस्मा-
दत्रविशिष्यते सरःसिंधुषुसर्वासुस्नानंगर्ह्यतेतनः किल ३ रजस्वलाभवेयुस्तावर्षासुऋषयोवदन् तत्स्नायीतनवैता-
सुयावत्पादृट्प्रजेदिति ४ एवंमेसंशयंतातछेत्तुमर्हस्यशेषतः निषिद्धेषुप्रवृत्तायासाकथंसंशयोमहान् ५ ईश्वर
उवाच महाप्रभावागंगाद्यामहान्द्योयतः स्मृताः स्वप्रभावस्त्वसामर्थ्याद्दोषोरजः कृतःस्मृतः ६ शृणुवत्सत्वया-
पृष्टंसर्वंतत्कथयामिते रजस्वलात्वदोषोऽस्तिनदीस्वत्रनसंशयः ७ महानदीषुनपुनरेषदोषःकथंचन क्षुद्रायास्तासुदो
षोयंनिश्चितंसमुदाहृतः ८ तावन्महानदीनापीसूर्यपुत्रीगुणाधिका पुण्योदकापापहन्त्रीरजोदोषः कथंत्विह ९ कृता-
दौशुचिमासेतुजन्मैतस्यायतोऽभवत् जन्ममासेततःस्नानंतस्याःपापनिषूदनम् १० किलाभूद्देवसरितःस्पर्धासु यज
यासह पावित्र्यगुणतःसापिगंगायाश्चाधिकाभवत् ११ ब्रह्महाब्राह्मणःकश्चिज्ज्ञात्वागंगांसमागतः विवर्णकालव
दनश्चांडालसमरूपधृक् १२ श्रुत्वातुतापीमाहात्म्यंसतुतापींसमागतः त्रिदिनस्नानमात्रेणतस्यचांडालतागता १३
ततःसर्वैस्तमुनिभिस्तापिन्येवसमाश्रिता जन्हुकन्यापरित्यज्यस्तुर्वद्भिःसूर्यजांमुहुः १४ ततोगंगाजगामाशुकपिता-
महनिवेशनम् रुदतीगद्गदंदीनाविवर्णाक्षीकृताकृतिः १५ ततःस्वयंभुवापृष्टाकस्माद्दीनासिजान्हवि कथंरोदिषि
वैदुःखमेतत्कस्मात्त्वयिस्थितम् १६ श्रीगंगोवाच तातताप्तीनामनदीसूर्यपुत्रीहविश्रुता नयासर्वाःस्रवंत्योहि
जिताःपावित्र्यगर्वतः १७ तस्यास्तस्नानमात्रेणपापिष्ठाअपिमानवाः कर्मबंधान्परित्यज्यमुक्तास्तेनात्रसंशयः १८ ए
वंविधप्रभावोत्र कस्याःसिंधोर्नदृश्यते यादृशःसवितुःपुत्र्यास्तयाहंचस्वभावतः १९ निर्जितायोमयिस्नातोमानवः

१ नदीषु-

स्वर्गमाप्नुयात् मोक्ष्यतेरविजास्नानाद्दृष्टामत्तोऽधिकामया २० पूर्वाम्नातंयन्मदर्थेकापिस्त्रोतस्विनीनहि सर्वासामपिना
मार्हत्वप्रसादात्सितामह २१ अद्यप्रेयन्महत्त्वंतत्तयासर्वपराहृतम् सर्वासांसेवज्येष्ठाभूद्भूयसीमान्यतामगात् २२
स्थापिताहत्वयातानतनदीनाज्येष्ठतापदे सात्वन्यथाकृतिश्चकेतपत्यासकृतयारवेः २३ स्वपरोभवनोऽनंप्रामाहंभगव-
न्निह त्वंसृष्टेस्तुयथाब्रह्मन्नन्यथाकुरुमाकिल २४ गंगायास्तद्वचःश्रुत्वाब्रह्माकोपवशंययौ आहूयनारदंप्राहमा-
हात्म्यंह्रियतांत्वया २५ निर्माहात्म्यायथातापीलोकेभवतिनारद नथात्वयाविधानव्यंनात्रकार्याविचारणा २६
इतिश्रीस्कंदपुराणेआषाढमासमाहात्म्येप्रथमोऽध्यायः १ ७ ईश्वरउवाच ततोजहारसमुनिस्तापीमा
हात्म्यमादितः यद्दीनंमुनिभिःसर्वमनुभूतमनेकधा १ तस्यापहारपापाच्चसोऽज्ञानोनारदोऽभवत् आचख्यौ-
ब्रह्मणेगत्वामाहात्म्यंतद्धृतंयथा २ स्वस्यचाज्ञानयुक्तत्वंमाहात्म्यहरणात्ततः किंकरोमीतिकथयममज्ञानंकथभ
वेत् ३ अज्ञानान्मरणंश्लाघ्यंपुरुषस्यजगद्गुरोः उपार्जयतिपापानीत्यज्ञानान्नःश्रुतंकिल ४ किंकरोतिकुलेजन्म
किंकरोतिकुतोधनम् यद्यज्ञानंभवेत्पुंसस्तेनसर्वंविनश्यति ५ अज्ञानयुक्तःपुरुषोदिवसेदिवसेकिल दुर्योजय-
तियेनात्रदेशेकालेनमुच्यते ६ निर्धनोपिवरंज्ञानीकुलहीनोऽपिनावरम् ज्ञानीसर्वमवाप्नोतिलब्धमज्ञानतोव्रजेत्
७ तदाचराम्यद्ययेनज्ञानंमत्तभवेन्मम उपायःकोस्तिदेवेशयेनाज्ञानंव्रजेन्मम ८ ततःप्रजापतिस्तापींप्रशशंसा
श्रुसादरम् येनसूर्यसुतादेवीपरितोषंजगामह ९ महाप्रभावात्संतापिप्रभावःकेनहन्यते त्वदीयोयंचसर्वासांनदी
नामाधिकोभवत् १० यस्यसूर्यस्यकिरणैःपुनातिभुवनत्रयम् यत्पादस्पर्शमात्रेणयांतितीर्थानियोग्यताम् ११
तस्यत्वदुहितानामतत्पापित्र्यंकिमुच्यते स्पृष्टानित्वत्पितुःपादैरन्यासांसरितांकिल १२ जलानियांतिपापित्र्यंत्व-

१ परितप्तः २ अविधिनाकर्मकारयति॰

यार्किंविवदेदिह जगत्तमोपहारित्वंव्रतंयस्यनिरंतरम् १३ तत्पुत्रीस्नानकर्तृणांतमोहंतिकिमद्भुतम् इतिप्रशंसितापीब्रह्मणामुदिनाभवत् १४ तत्रागत्यततोवाक्यंब्रह्माणमिदमब्रवीत् ताप्युवाच पितामहकिमर्थंत्वंप्रशंससिनिगद्यताम् १५ प्रशंसामत्पतिष्ठावाजानेयंपरमेश्वर धन्याहंत्रिजगत्पूज्यात्वयाहंचप्रशंसिता १६ ब्रह्मोवाच नदीज्येष्ठाचतपतिमयागंगापुराकृता त्वन्महिम्नापराभूतानदीयंदीनतामगात् १७ आगतामत्समीपेतुनारदेनाप्यहास्यंम् महिमानंतवगुरुंतनोस्याज्ञानमाव्रजत् १८ अनुगृह्णीष्वमद्वाक्यान्नारदंमुनिसत्तमम् गंगायामहिमानंचएतद्यात्वेमहानदि १९ तपत्युवाच त्वत्प्रार्थनाकथंवध्यांप्राणायावत्करोम्यहम् पुनःप्राणागताःश्रेष्ठनपुनर्मानखंडनम् २० प्राणाविनश्वरालोकेमहिमात्वविनश्वरः ईश्वरउवाच विचार्यचततस्तापीब्रह्माणंसमभाषत २१ नारदस्यपुनर्ज्ञानमत्प्रसादाद्भविष्यति तस्याःप्रसादंसंप्राप्यव्यवस्थांसमयान्वत ब्रह्मोवाच तापियोमहिमालोकेसर्वदातेभवत्पुरा २२ असंशयंसमहिमातवाषाढेभविष्यति यंयंकामंविचिंत्येहआषाढेयेनिमज्जनम् २३ करिष्यंतिहितेषांचसंसकामोभविष्यति स्वर्गार्थीप्राप्नुयात्स्वर्गंमोक्षार्थीमोक्षमाप्नुयात् २४ अन्यद्यद्दुर्लभंलोकेतदाषाढेभविष्यति गंगापिसरितांमध्येज्येष्ठत्वंलभतापुनः २५ अन्याश्चसरितःसर्वायथास्वमहिमोत्करा भवंतु त्रिजगच्छ्रेष्ठाःपूर्वमेवप्रसादिताः २६ इतिश्रीस्कंदपुराणेआषाढमासमाहात्म्येद्वितीयोऽध्यायः २ ६

ईश्वरउवाच ताप्यदुष्टमनाःसर्वंमनुतेस्मविधेर्वचः तदारभ्यशुचौस्नानंतपत्यांपापनाशनम् १ ब्रह्मणोवरदानाच्चसमीहितफलप्रदम् सूर्यजायांशुचौस्नानंदेवानामपिदुर्लभम् २ किंपुनर्मानवानांचविनाभाग्यनलभ्यते यत्पुनःस्नानकर्तृणांपापिनामपिनाकदम् ३ यैस्तुचीर्णंतेमनुजाःसर्वपापविवर्जिताः विमानवरमारूढाअप्सरोगणसेविनाः ४ अंतेतुस्वर्गसंप्राप्ताःपूज्यंतेत्रिदिवैरपि स्वर्गदंभोगदंचैवमुक्तिदंमुक्तिमिच्छताम् ५ आषाढस्नानतो-

नास्तिपरंपापस्यभेषजम् नरकस्थादिवंयांतिस्वर्गस्थामोक्षगामिनः ६ पितरस्तस्यसंतुष्टाआषाढेस्नातियोनरः मा-
घस्नानाद्दशगुणमाषाढस्नानजंफलम् ७ दंभेनापिकृतंयैस्तेपिस्वर्गामिनोगताः घर्माकुलितदेहोऽपियःस्नातितप-
तीजले ८ आषाढेपुरुषस्तस्यमाघस्नानफलंभवेत् अस्तिकश्चिद्वणिक्पूर्वंसर्वधर्मबहिष्कृतः ९ जैनधर्मपरोनित्यं
वेदवादपराङ्मुखः पितृपितामहाद्यास्तुतस्यमूकत्वमागताः १० पाखंडविहिनाचारान्मूहत्कष्टमुपागताः कदाचि
दश्ववाणिज्योनिर्गतोलाभकारणात् ११ विक्रेयंवस्तुकीत्वाचस्वार्थेनमहतायुतः स्वसार्थसंयुत स्ताप्याः शुचौप्राप्तो
महाजलम् १२ तस्माद्भयेनोत्तरतोविपर्यैतिस्मतत्तदा वस्तुतापीजलेमग्नंवणिक्मग्नोऽभवत्तदा उन्मज्यचतनः
शीघ्रमुडुपेचावलंबितः तटंताप्याःपरंचैवनिर्गतश्चवणिग्जलात् १४ तस्यदेहाच्युतंवारिपीत्वामूकारक्तपूर्वजाः ता
पीजलप्रभावेन मूकत्वंविजहुःक्षणात् १५ वणिजस्तदर्शनस्थाश्चस्तवंश्चपुनःपुनः वत्सधन्यावयंयेषात्वसत्पुत्रे
भवत्किल १६ येनकष्टान्मूकभावान्मोचिताहेलयावयम् १७ इतिश्रीस्कंदपुराणे आषाढमासमाहात्म्येनृ-
तीयोऽध्यायः ३ ४ ईश्वरउवाच इतितेषांवचःश्रुत्वादृष्ट्वाक्षणावणिजःकृती पप्रच्छविषयाविष्टो
भीतस्तद्दर्शनाद्वणिक् १ केयूयंकथमत्रस्थामूकत्वान्मोचिताःकथम् आख्यात सर्वमेतन्मेविस्मयोयंमहान्हृदि
२ तच्छ्रुत्वातेप्यवोचंश्चवयंतुतवपूर्वजाः वेदमार्गपरित्यागान्मूकाःप्रेतत्वमागताः ३ अस्यामकामात्स्नातस्यपी-
त्वातेदेहानिःसृतम् वितृष्णागतपापाश्चत्वत्प्रसादाच्चवाग्मिनः ४ तापीजलप्रभावोऽयंश्रुतोजातश्चसांप्रतम् य
न्नीरजलपानेनप्राप्यतेपरमागतिः ५ दुर्गतेभेषजंनास्तिशुचिस्नानमृतेभुवि वेदमार्गात्परोमार्गोनाभूच्चनभविष्य
ति ६ यमाश्रित्यनरानैवदुर्गतियांतिकर्हिचित् येषामंतेश्रुतिप्रोक्ताद्दृषोत्सर्गादिसत्क्रियाः ७ क्रियतेदारुणंतेषा
दुर्गतित्वंकथंभवेत् तएवशोच्याजगतिनैवैषावैदिकीःक्रियाः ८ यस्येतानिनदत्तानिप्रेतश्राद्धानिषोडश प्रेतत्वंनि-

लंतस्यश्राद्धैरन्यैःकृतैस्तकिम् ९ एकादशाहेसंप्राप्तेयस्यचोत्सृज्यतेवृषः प्रेतत्वंनैवतस्यास्तिपुण्यांल्लोकानवाप्नुयात् १० येचश्रुतिक्रियाव्रात्याःपाखंडधर्ममाश्रिताः पराङ्मुखाविष्णुभक्तौतेनरादेवदंडिनः ११ वेदक्रियाविनानास्तिलोकेत्यस्मिन्परत्रच सौख्यंनस्मात्तदासेव्यंवेदकर्मनरोत्तमैः १२ तस्मात्तातत्वयात्याज्योवेदधर्मोनकर्हिचित् यमाश्रित्यनरश्रेष्ठलभतेपरमागतिं १३ जीवद्भिर्बहुधावादाःक्रियंतेऽत्रयदृच्छया मृतैस्तुक्रियमदूतानांहस्तस्थत्वेनदुष्कराः १४ निमग्नंतत्रयद्दुस्कृतस्यशोकंचमाकृथाः संपदोविपदश्चापिदैवायत्तायतःस्मृताः १५ यदकस्माद्भवेयुस्तावित्यस्तमचिंतिताः तस्माद्धर्षश्चशोकश्चनकार्यस्तत्समुद्भवः १६ अत्रास्थित्वाकुरुस्नानपंचरात्रमथादृतः आरभ्यैकादशीयावत्पौर्णमासींसमाहितः १७ तत्पुण्यदेहिनोवत्सयेनमुक्तिंलभेमहि एवंतवाविकल्माषंभविनानात्र संशयः १८ अस्माकंपश्यतामेवकर्चिद्विप्रत्यमोचयत् आषाढेपंचदिवसस्नानपुण्येनतत्कृतः १९ प्रेतभावान्महाघोरान्मुक्तःसंतुमहोदरात् नापीतटंतदारभ्यभजामोदूरतःस्थिताः २० लभामहेनचस्पर्शमन्यानपिजलाशयान् तस्मात्तृषार्त्ताःसर्वत्रभ्रामामःकृतपापकाः २१ इतिश्रीस्कंदपुराणेआषाढमासमाहात्म्येचतुर्थोऽध्यायः ४

ईश्वरउवाच इतितद्वचनंश्रुत्वावणिक्पुत्रोत्यभाषत कोऽयंभवद्भिःकथितोब्राह्मणःप्रेततामितः १ केनकर्मविपाकेनसघोरांप्रेततामियात् कथंतस्यकृतेनात्रमोचितस्तन्निगद्यताम् २ एतांविचित्रांपरकथांश्रोतुंकौतूहलंमम तस्यैवंवचनंश्रुत्वाप्रोचुस्तेपूर्वजास्ततः ३ अस्माकंशृण्वतांवत्सक्षुत्तृषापीडितात्मनाम् मूकानांसोपिविप्रश्चमिलितश्चस्कदुःखितः ४ शूचीमुखोमहानध्वक्षुत्तृषाविह्वलोभृशम् अस्माभिःसंत्रयापृष्टःकस्येदंकर्मणःफलम् ५ विप्रउवाच विप्रोगुर्जरदेशीयोनाम्नावेदश्रवाअहम् मिथ्यावादीत्यनाचारीग्रासलोभपरायणः ६ मूर्खैःकांश्चिन्मंत्रवाङ्मीलोकानामग्रतःपुनः चतुर्वेदोऽहमित्येवमाहिनाग्निरितिब्रुवन् ७ लोभान्मोहान्मयाकारिनिषिद्धान्न

१ निष्पापंमनइतिशेषः

प्रतिग्रहः अभोज्यानांगृहेभुक्तंद्रव्यलोभादनेकधा ८ गृहेषुरजकादीनांपिनृदेवक्रियाःकृताः तदन्नैश्चकृतावृत्ति
स्तदन्नेष्टिषुयाजनम् ९ तथाप्रतिग्रहाघोरामहिषाद्याःकृतामया तथाऽशून्यानिवर्षाणिनक्तानिप्रतिगृण्हता १०
नदत्तंनहुतंकिंचित्पर्वकालेऽपस्थिते नभोजितामयाविप्राःकालेश्राद्धंकृतंनच ११ प्रायश्चित्तंनव्यधायिउषसिचरविंन-
तिः न्यायार्जितंधनंकिंचिन्नार्जितंकुप्रतिग्रहैः १२ नात्मानंशोधयामासपतितः पापकर्दमे कालांतरेणार्पितंतद
युक्तेनमयापुनः १३ द्विगुणेत्रिगुणेजातेतस्मिन्वित्तेऽतिहर्षितः नाज्ञासिषंकस्यवित्तंप्रातर्मृत्युर्भविष्यति १४ या-
दृशःपुरुषोलोकेमनिरत्तस्यचतादृशी पौनःपुन्येनपापानांमतिःपापेप्रवर्तते १५ कस्यार्थेक्रियतेपापंनैषबुद्ध्याभिव
र्तते लुब्धानामनिलोभेषुकामिनांकाम्यवस्तुषु १६ महतीवर्ततेबुद्धिर्नैवयावत्सजीवति परलोकंततःप्राप्ताभुजा-
नःपापकर्मणाम् १७ फलान्यनुतपन्नेवनेहज्ञानमजायत इहज्ञानंयदिभवेत्प्रायश्चित्तेकृतेपुनः १८ बाधतेनैवतन-
त्सापमेवमाहुर्मनीषिणः ब्रह्महत्यादिपापानामनोनिष्कृतयःकृताः १९ आत्मनीतैरुक्तत्पुंभिर्ज्ञाताज्ञातस्यवैपुनः
प्रायश्चित्तप्रकर्तव्यंपरत्रात्मविशुद्धये २० नकृतयन्मयाकिंचिन्मोहाविष्टेनचेतसा पापेनोपार्जितंवित्तंगतंचिंताभव-
त्पुनः २१ तद्दर्जनेयद्भवतिनत्सापंशिरसिस्थितम् ततोविषादोयोजातःसर्वाशिर्वनिषूदनः २२ ततोमृत्यवशंप्राप्तो
गृहीतोयमकिंकरैः पर्यालोच्ययमेनाहंपातितोनरकंबुधौ २३ तत्रमेपीड्यमानस्यनिष्कृपैर्यमकिंकरैः घटिकाब्द-
सहस्रस्यतुल्यावेसमजायत २४ पात्यमानस्यमेजातावर्षाणांपंचविंशतिः ततोजिगमिषुर्दक्षाप्रयागेसार्थमुत्तमम्
२५ माघस्नानंविकुर्वंतंमहानद्याश्वसंगमे मत्पुत्रोपिययौतेनवेणीसार्थेनसंगतः २६ माघस्नानंततःकृत्वापुण्यं
मत्यमयाद त तस्यपुण्यप्रभावेननरकान्निर्गतःपुनः २७ घोरप्रेतत्वमापन्नःसूच्यास्यश्वमहोदरः जलाशयाःसु
बहुशःसंतिचान्येपदेपदे २८ शर्विःसीतोदकानद्यःसरांसिविविधानिच तृषार्तःक्वापिनलभेचैकामप्युदकांजलिम्

॥२९॥ विप्रोच्छिष्टानिभूतेभ्यः सतिलान्नानिसर्वतः सिक्थमेकंनचाग्रोमिक्षुधार्तःसर्वतोभयात् ३० कदाचिदपिकिंचिच्च ल
भेन्नवाजलंयदि सूचीमुखस्याहरतःपिबतोनमहोदरम् ३१ ममपूर्येतवर्षाणांशतेनापिकथंचन क्षुत्तृष्ाव्याप्तदेहोहंन-
स्फरंप्राप्युयांक्षणम् ३२ प्रेतत्ववर्तमानस्यवर्षद्वादशकंगतम् इतिवःसर्वकथितम्मयाप्रेतत्वकारणम् ३३ इतिश्रीस्क
दपुराणेत्र्याषाढमाहात्म्येपंचमोऽध्यायः ५ ॥ ६ द्विजउवाच दिगंबरामलाश्लिष्टास्थिमात्रशरीरकाः मूकामुं
डाश्चलंबोष्ठादंतुरश्चभयानकाः १ इमामवस्थांसंप्राप्ताविपाकात्कस्यकर्मणः तन्मेनिगद्यतांसर्वंममात्रास्तिकुतूहलम्
२ ईश्वरउवाच इतिनेनद्विजेनोक्तामूकवद्दुःखमुद्वहताः संज्ञयाज्ञापितंसर्वंयत्कृतंपूर्वजन्मनि ३ लंघनवेदमार्गस्य-
पाखंडस्यानुवर्तनम् नपिंडदाननस्नानंनपितृणांचतर्पणम् ४ नपूजानचसत्कारोद्विजानांचकृतःक्वचित् तेनेनांकुदशा
प्राप्ताः कल्पभोग्यांस्फदारुणाम् ५ समानदुःखाःस्वत्कर्ममिथएवप्रमादिनः अन्वगच्छांमतेसर्वेऽप्यन्यजन्मजलार्थिनः
६ सार्थोजगामतपतींवयंतुदूरनःस्थिताः तस्यसार्थस्यमध्यस्थोद्विजपुत्रःसमाययौ ७ तेननत्वकृतंस्नानंत्र्याषाढेतप
तीजले यथावन्मासमेकंतुनस्यातेभोजिताद्विजाः ८ तदलुप्तामितिप्राप्यस्नानंसंपूर्णमस्कृतं कृत्वाषाढफलंपित्रेददौ
ब्राह्मणसन्निधौ ९ त्र्याषाढस्यफलेदत्तेप्रेतदेहंचनक्षणात् त्यक्त्वादेहोदिव्योभूद्विमानवरमास्थितः १० उवाचपुत्रं
मुदितोवत्ससाधुत्वयाकृतम् नरकादुद्धृतःपूर्वंदारुणाद्दुष्टकर्मणः ११ इदानींतुप्रेतभावान्मोचितोदुःखसागरात् तेध
न्याःपुण्यवंतश्चतैश्चलोकाह्ययंजितम् १२ भवंतियेषांसत्पुत्राःपुण्यकर्मपरायणाः त्र्यदातारोऽपिदातारः पापिनोऽपिचपापि
नः १३ वरमेकःसुपुत्रोस्तुकुपुत्राणांशतेनकिम् प्रीणातिस्वपितॄन्यस्मात्सतनंपितृकर्मणा १४ सफलंजीवितंतस्यधन्या
स्तेनैवपूर्वजाः तस्मात्सनिदिनंदेवाःपितरोमनुजास्तथा १५ ऋषयश्चैवभूतानिसमीहंतेचसत्कृतिम् एतान्सत्कृत्ययो
भुंक्तेतस्माच्छ्रेष्ठतरोहिकः १६ कृतार्थाःपितरस्तस्यतथामातामहाऽपि भवंत्यकालेनप्रेतास्तस्यपुत्रप्रपौत्रकाः १७ ध

१ भुंजानाइतिशेषः

नानिदीर्घमायुश्चनशोकाआपदस्तथा नसंततेश्चविच्छेदोयःसदाचारवान्नरः १८ आषाढेपंचदिवसस्नानेनप्रेतभावतः
विमुक्तःशेषपुण्येनविष्णुलोकोममाप्नुयः १९ इत्युक्तासनिजंपुत्रमस्माकंपश्यतांतदा विमानवरमारूढोवैष्णवंलोकमव्र
जन् २० सार्द्धसार्थेनतत्पुत्रउद्धृत्यपितरंनिजम् मुदापरमयायुक्तोजगामचयथागतम् २१वयंतत्रस्थितास्तातनिराशास्मः
स्वमोक्षने कोऽत्रमोक्षयितान्योस्तिप्रेतभावात्सुदारुणात् २२ तन्नःपुत्रोसिनुपुराणपाखंडिवचनेस्थितः नोनदास्यसितत्सु
एयंयेनमुच्यामहेवयम् २३ नरैःपाखंडिभिःकव्यंदीयतेयत्तुकिंचन कस्मादपिप्रसगात्तत्सिनृणांनोपसर्पति २४ साप्रत
तपतीन्नीर्थेकुलंस्नानेनपावितम् आषाढेयोग्यतांप्राप्तोत्यनिच्छन्नपिदैवतः २५ सर्वथायदसंभाव्यंयत्सत्यंमनोरथात्
अकस्माच्चतदानीयविधिर्घटयतेध्रुवम् २६ इतिश्रीस्कंदपुराणेआषाढमासमाहात्म्येषष्ठोऽध्यायः ६ ७
ईश्वरउवाच कस्त्वंजैनसमाचारःकुतापीत्यमहानदी आषाढकृतेस्नानमनिच्छोरपिदैवतः १ सर्वथायदसंभाव्यंय-
त्सत्यंदुर्लभंनृणाम् तस्माद्भाविशुभंचात्रनूनंमन्यामहेत्यतः २ एतेषांसमवायोयोदुष्करःसमजायत इतितेषांवचःश्रु
त्वासंवर्णिग्विस्मयान्वितः ३ जैनधर्मंपरित्यज्यचक्रेस्नानंविधानतः एकादशींसमारभ्ययावत्पंचदशीस्थितः ४ कृत्वा
श्राद्धंतुविधिवत्सौर्णिमास्यांसमाहितः नापीतटेददौपुण्यंपूर्वजेभ्योयथाविधि ५ आषाढपंचदिनज स्नानेनयदुपार्जितम्
६ आषाढपंचदिनजंस्नपनंचपुण्यंतेप्राप्यतत्रविजहुर्विकृतंशरीरम् आरुत्यचाशुक्रमरुतांरुचिरंविमानंतेविष्णुलोकम-
गमन्नहियत्रपापम् ७ उद्धृत्यवैसंचवणिक्निजपूर्वजांश्चअत्यंतकष्टजनकाश्चपरेतभावात् आषाढमासस्नवनप्रभव
चदृष्ट्वाभूपश्चवृषसवनायसमुत्सुकोभूत् ८ तेनाषाढदशस्नानंत्रिगुणंत्वेकचेतसा तत्पुण्यात्तत्पदोपारोयज्जगत्यान-
शोचति ९ ईश्वरउवाच माहात्म्यमेतदुदितंरविनंदनायआषाढमासस्नवनस्ययथाप्रवृत्तम् स्नानस्ययस्त्वविकलं
फलमिच्छतीहश्रोतव्यमेवखलुतेनमहायहारि १० इतितेकथितंसर्वंयत्पृष्टंत्वयासुत ताप्याषाढफलंसम्यक्किम

त्यच्छ्रोतुमिच्छसि ११ इतिश्रीस्कंदपुराणेरुद्रकार्तिकसंवादेताप्याषाढस्नानमाहात्म्येसप्तमोऽध्यायः ७ ॐ
स्कंदउवाच आषाढस्नानजंतातत्वयाप्रोक्तंमहाफलम् आषाढेतपतीस्नानंसर्वपापहरंनृणाम् १ कोविधिस्तस्यकिं-
पुण्यंकेतत्रनियमास्थिताः तेषांकिंकिंफलंतन्मेब्रूहिसर्वमशेषतः २ ईश्वरउवाच प्रातःकरोतियःस्नानंमध्यान्हेपि
यथाविधि द्विगुणंफलमाप्नोतित्रिस्नानात्त्रिगुणंफलम् ३ पयोष्णीसंगमेस्नानंदेवानामपिदुर्लभम् यस्माच्चतुर्गुणंपु
ण्यमाषाढस्यमकीर्तितम् ४ तथैवबिंदुमत्याश्चसंगमेऽपिनिगद्यते मूलतापाःकृतंस्नानेपुनर्जन्मनविद्यते ५ गोम
त्याःसंगमेचैतत्सर्वपापहरंस्मृतम् संगमेयत्रकुत्रापिद्विगुणंपुण्यमुच्यते ६ तथैवद्विगुणंप्रोक्तंस्नानंशंकरसन्निधौ स-
न्निधानस्यलिंगस्यचतुर्गुणमुदाहृतम् ७ शालग्रामशिलोपेततथैवस्याच्चतुर्गुणम् स्नानंकुर्वीतमौनेनस्थित्वाचैकाग्रमा
नसः ८ आदित्यमनसाध्यात्वामार्जयेत्पंचवारुणैः ऋग्भिस्त्वद्भैवताभिश्चमार्जयित्वाततःपरम् ९ सूर्यपुत्रिनमस्तुभ्यं
नमआषाढसंभवे त्वत्प्रसादेनसंपूर्णमाषाढस्नानमस्तुमे १० इतिप्रार्थ्यनमस्कृत्यततःस्नायाच्चवाग्यतः स्नानांतेनर्पणं
कुर्यात्पितॄनुद्दिश्ययत्नतः ११ ततोवेरुपस्थानंकुर्यात्तद्गतमानसः बिभ्राड्बृहच्छिवसंकल्पसूक्तपुरुषसंज्ञकम् १२
मंडलब्राह्मणंतत्रनिर्गत्यचततोबहिः एवंस्नानविधिंकृत्वादेवतानांचपूजनम् १३ होमंदानंयथाशक्तितःकुर्याद्विच-
क्षणः एवंप्रतिदिनंकर्ममासयावत्समाहितः १४ यद्यत्करोतिभक्त्यात्रअक्षयंसकलंभवेत् सर्वपापहरंस्नानंयत्रतत्रप्र
कीर्तितम् १५ आषाढेकुरुतेयस्तुसूर्यपुत्र्याःप्रदक्षिणाम् योजनेयोजनेस्नानंकुर्वन्नेकाग्रमानसः १६ प्रवाहमूलमार
भ्ययावत्सरितांपतिः विमुक्तःकर्मबंधेभ्यः कैवल्यंसोधिगच्छति १७ ब्रह्मचर्येणकुरुतेयोजनाद्यैप्रदक्षिणाम् सब्रह्म
लोकमाप्नोतिदुर्लभंमनुजैरपि १८ योजनेयोजनेस्नानंशतयोगोदानजंफलम् समग्रंफलदंप्रोक्तमशक्तस्योष्णवारिणा
१९ स्नानार्धंफलदंकठस्नानंसद्भिर्निगद्यते स्नानार्धंपादफलदंपादार्धस्याभिषेचनम् २० ऋग्भिर्देवताभिश्चमुनिभि

परिकीर्तितम् स्नानान्येतान्यशक्तस्यकीर्त्यतेत्वनुकल्पतः २१ अन्येदेशस्थितोयस्कपुमान्मृत्तिनविग्रहः कुर्वन्नन्यजलैःस्न
नंसपादफलमश्नुते २२ एकभक्तेनयःस्नायात्सस्वर्गाच्चात्यतेनतु अयाचितेनयत्पुण्यंसपादंजायतेपुनः २३ नक्तभोजीन-
रःस्नात्वाब्रह्मलोकेमहीयते उपवासस्नानकर्तापुनर्नैवप्रजायते २४ फलभोजीनरःस्नात्वारुद्रलोकमाप्नुयात्
व्रतेनयःस्नातिस्वर्गलोकेवसेच्चिरम् २५ स्नानंकुर्वन्पत्रभोजीशक्रस्यैतिसलोकताम् धात्रीफलैस्तिलैर्वापिस्नात्वास्वर्गेमहो
यते २६ क्षीणोदकंपरित्यज्यस्नानंकुर्यात्समाहितः वारुणंलोकमासाद्यतत्रभोगान्समश्नुते २७ तैलाभ्यंगंवर्जयित्वारु
पवान्जायतेदिवि चंदनंतुपरित्यज्यचंद्रस्यैतिसलोकताम् २८ पुष्पवर्जीनरोयस्कनंदनेभोगभाग्भवेत् ततोमहींतुपुनरा
गच्छेद्वरयमध्यतः २९ कुर्वन्नाषाढसवनंनस्वलोभधरोभवेत् स्वर्गेक्रीडत्यप्सरोभिर्यावदाभूतसंप्लवम् ३० एकांतरोप-
जीवीतु मुनिलोकंसमश्नुते गोधूमान्वर्जयित्वातुभूमौराजाततोभवेत् ३१ श्रीफलंवर्जयित्वातुदैवैर्वैमानिकोभवेत् मद्यव-
र्जीस्वर्लोकंमधुर्वर्जीचगच्छति ३२ परान्नंवर्जयेद्यस्कसयातिपरमांगतिम् भूमिशायीनरोयस्कशक्रलोकंसगच्छति ३३
ब्रह्मचर्येणयोमर्त्यआषाढस्नानमाचरेत् अप्सरोलोकमासाद्यभुक्तेभोगान्मनोरमान् ३४ वांछितान्लभतेकामान्नरस्ता-
बूलवर्जनात् गंधर्वलोकमाप्नोतिनरोगंधान्विवर्जयेत् ३५ शाकाहारेणयोमासमाषाढेसवनंचरेत् आनिष्ट्यंदेवतानांस
लभतेमानपूर्वकम् ३६ त्रिकालंविष्णुमभ्यर्च्यमहेशंवापिभक्तितः सूर्यंत्रिकंकारयतितत्तल्लोकंसमश्नुते ३७ स्नात्वापूतं
जपेद्व्यामासैप्रतिदिनंद्विजः ब्रह्महत्यादिकैःपापैर्मुच्यतेनात्रसंशयः ३८ तिलहोमसहस्रंवाप्राणायामास्तषोडश कुर्व-
न्पूर्वविधानेनसर्वमाप्नोतिगोभवेत् ३९ विष्णुलोकमवाप्नोतिकल्पंयावच्चतिष्ठति ततोवस्कमतीप्राप्यसार्वभौमोभवेन्नरः
४० विष्णोर्नामसहस्रंतुयोजपेत्तत्रतिष्ठति ततोवस्कमतीप्राप्यजपस्तल्लोकमश्नुते ४१ अष्टोत्तरशतंनाम्नांतपत्यांवाज
पेन्नरः भक्त्यापरमयायुक्तएकचित्तोदृढव्रतः ४२ सूर्यलोकंसलभतेवासंयत्रखेःस्मृता प्राणान्विदधनाताप्यांयथाशक्त्या-

दिनेदिने ४३ भक्त्यास्नानंविधायादौलभतेपूर्ववत्फलम् स्नात्वायःकुरुतेदीपंमासमेकंनिरंतरम् ४४ आयतनेनुदेवा
नांतत्लोकमुपैतिच ज्येष्ठस्यपौर्णमास्यादिकृत्वाषाढस्यपूर्णिमाम् ४५ तावत्स्नानंप्रकुर्वीततत्पाकृपंचद्दिनोत्तरम् यद्या
षाढद्वयंवर्षेकदाचिदुपपद्यते ४६ तदाद्वितीयेयःस्नातिद्विगुणंफलमाप्नुयात् ४७ इतिश्रीस्कंदपुराणेआषाढमास
माहात्म्येअष्टमोऽध्यायः ८ ७ ईश्वरउवाच आषाढस्नायिनांवत्सशृणुदानफलंमहत् येनदत्तेनपुरुषोलभ
तेवांछितंफलम् १ धेनुंददानिविप्रायप्रत्यहंयःपयस्विनीम् विमुक्तःपातकैःसर्वैरविलोकेसपूज्यते २ यावत्तपंतिसूर्यस्ये
तावत्कालंसतिष्ठति पश्चात्सविष्णुसायुज्यंदुर्लभंप्रतिपद्यते ३ स्वशक्त्यात्यथवापक्षंपक्षार्द्धवानदर्धकम् एकंवापिदि
नशक्त्यासोपितत्फलभाग्भवेत् ४ वित्तशाठ्यप्रकुर्वाणोदद्याद्यदिनकिंचन पुण्यंकिंचिन्नलभतेनरःप्रत्युतपापभाक्
५ प्रत्यहंगजदानाच्चशक्रोभवतिनिश्चितम् रथदानान्महत्वंतुहयदानात्तदुन्नतिम् ६ गोदानंतोदशगुणंफलंत्वनुदुह्यो
स्मृतम् धुर्याणांबलयुक्तानांतरुणानांतरस्विनाम् ७ एवंतुमहिषीदानात्पतिरप्सरसांभवेत् कल्पमेकंवसेत्तत्रभुंक्ते
भोगान्यथेप्सितान् ८ वर्षाशनक्षमांभूमिंद्विजायप्रत्यहंददत् ब्रह्मलोकंसमासाद्यकल्पस्थायीभवेन्नरः ९ अन्व
हंयःसहस्रान्चविप्राणांभोजयेन्नरः तापीनटेकारयतिसत्यलोकंसगच्छति १० कल्पमेकंसवैतत्रपूज्यतेविबुधैरपि
ततोमोक्षपदंयातितत्कैरैरपिदुर्लभम् ११ वित्तशाठ्यंपरित्यज्यस्वशक्त्यायस्तुभोजयेत् तदर्धवानदद्वैवाशतसंख्यमया
पिवा १२ विंशतिंचाचनुर्युक्तामथद्वादशभोजयेत् तदेवफलमाप्नोतितथाचैकंचभोजयेत् १३ वस्त्रदानान्नरोयातिलो
कंश्रेष्ठप्रजापतेः दुकूलदानशक्तोपिवस्त्रंकार्पासिकंददत् १४ नतस्यफलमाप्नोतितस्यदानंनिरर्थकम् तांबूलदानात्
पुरुषोभोगैर्नपरिहीयते १५ फलदानाद्यथेच्छंचसर्वानिप्राप्नुयान्नरः उपानहौनरोदत्वापादचारीनजायते १६ ताम्रक
स्यंचारकूटंजलपात्रंददातियः तत्तत्पात्रप्रदानेनतत्तदुक्तंफलंलभेत् १७ पायसंयावत्कल्पंतेदेवपीयूषपोभवेत् रूप्य-

दानात्कलत्राणिरूपाणिलभतेनिच १८ गोधूमशालिमुद्गानांतथैवयवमाषयोः व्रीहीणांचतिलानांचक्षेत्राणिफलवंतिच १९ ददातिकालेसकलमतस्यपुण्यंनिबोधमे यावंतोहिकणास्तेषांतत्तद्गुणासंख्यया २० वर्षाणिवसतेस्वर्गेदत्तातुल्यभोभवेत् अन्येषामपिधान्यानांदत्वाक्षेत्राणिमानवः २१ तद्बीजसंख्यास्वर्गेवर्षाणिसहनिर्जरैः रममाणोयथाकामंवासायरवलुकल्पते २२ इतिश्रीस्कंदपुराणेआषाढमासमाहात्म्येनवमोऽध्यायः ९ ७ ईश्वरउवाच गृहंददानियश्चापिनस्यपुण्यफलंशृणु नित्यमेकभूमिकंवामृत्याषाणविनिर्मितम् १ चित्रितंवर्णकैश्चित्रैःसर्वोपस्करसंयुतम् सविष्णुलोकमासाद्यस्वर्णरत्नविनिर्मिते २ प्रासादेरमतेनित्यंसर्वोपस्करसंयुते सहदिव्यपुरंध्रीभिःकल्पंयावन्मुदान्वितः ३ तावत्कालंवसेद्ब्रह्मलोकेयस्त्विष्टिकाप्रदः गृहकाष्ठपदंदत्वाशक्रलोकप्रयातिसः ४ यावत्कालंचंद्रसूर्यौतावत्कालंशिवस्थितिः दातात्रसमधान्यानांनिजवित्तानुसारतः ५ खारिद्रोणाढकप्रस्थकुडवानांचसंख्यया सस्वर्गेनिवसेद्दृष्टेवर्षाणीबीजसंख्यया ६ पूज्यमानःसुरैर्नित्यंरममाणंयदृच्छया स्वर्गलोकेवसत्कल्पंनिजशक्त्यातिलान्ददत् ७ गोधूमदानाकल्पंतुस्वर्गेतिष्ठतिहर्षितः स्वर्गेपापभयंनैवमाषदातारहिंदति ८ दातारंतंदुलानांयोमहलोकेसतिष्ठति घृतददानिविप्रेभ्यःस्नानंकुर्वन्दिनेदिने ९ स्वशक्त्यास्वसुधाहारोदेवतानांप्रियोभवेत् दुग्धंवादधिवायस्तुब्राह्मणेभ्यःप्रयच्छति १० स्वर्गलोकंसमासाद्यघृतकूल्यापतिर्भवेत् अन्नदानेनलभतेयद्यद्गृहंछनिमानवः ११ अन्नात्परतरंदानंनभूतंनभविष्यति नरःपुस्तकदानेनज्ञानवान्निश्चितंभवेत् १२ विद्यादानेनमोक्षंचलभतेकर्मसंक्षयः यस्मिन्यस्मिन्भवेदिच्छातत्तद्यात्प्रयत्नतः १३ इहलोकेपरस्मिन्वातान्यथालभतेक्वचित् स्त्रियोदानफलंत्वेतद्भर्तृभिःसहभुंजते १४ तत्तल्लोकगतासत्यःसंगयांतिचभर्तृषु यस्मिन्वयसिकालेवायथादत्तंमहात्मभिः१६ तस्मिन्वयसिकालेवतत्तथैवचलभ्यते पुण्येदेशेशुभेकालेश्रद्धयापरयातथा १६ शुभंद्रव्यंसुपात्रायेयद्दत्तंहित

दक्षयम् यदंगविकलंदानंफलतीहनतत्तथा १७ तस्माद्विकलंश्रेष्ठंतदर्थेश्रद्धयान्वितः अदत्तस्यचवृक्षस्यफलं
प्रत्यक्षमीक्षते १८ एकेदरिद्रादृश्यंतेधनवंतस्तथापरे समानकुलजानाश्चसमानमतयस्तथा १९ तथासमानकर्मा
णःसमानेंद्रियवृत्तयः समदत्तविभागाश्चलभतेस्वधनंप्रति २० तथापिकेचिद्दृश्यंतेधनवंत स्तथापरे सधनःपितृतःक
श्चित्तथाकश्चिच्चनिर्धनः २१ तयोर्विपर्ययोदृष्टःकारणादत्तमेवतत् सर्वेपिधनवंतःस्युरदत्तंयदिलभ्यते २२ परलोके
चकिंचिच्चश्रूयतेदुर्गतिःकिल तस्मादिहाप्यमुष्मिन्वानादत्तभुज्यतेक्वचित् २३ एवंनिश्चित्यदेयस्वंनिजशक्त्यनुसार
तः २४ इतिश्रीस्कंदपुराणेआषाढमासमाहात्म्येदशमोऽध्यायः १० ७ ईश्वरउवाच आषाढेतपति
स्नानात्तापकर्मक्षयोभवेत् अभुक्तंक्षीयतेकर्मभक्त्याचैवचयत्कृतम् १ दृश्यतेचैवमग्रेस्यफलंपुण्यस्यकर्मणः दुःखात्म
कंपापफलम्पुण्यस्यतुसुखात्मकम् २ यथेहचतथामुत्रपुरुषःकर्मणोवशात् सुखदुःखंचआप्नोतितस्मात्पापात्म-
कंत्यजेत् ३ दृश्यतेसुखिनःकेचित्धनपुत्रयुताजनाः दीर्घायुषोनीरुजश्चनिर्भयागुणिनोनराः ४ अपरेपिचदृश्यंते
रोगार्ताधनवर्जिताः अल्पायुषोपिपुत्राश्चनिर्गृहागुणवर्जिताः ५ तस्मात्पुण्यंचपापंचनिश्चित्यास्तीतिमानवः स्वा
त्पुण्येष्वादरपरोनपापेषुकथंचन ६ आषाढसवनात्पुण्यंपरमस्तीहभूतले धर्मइष्टश्चपूर्तश्चनास्त्यतस्तत्समोभु
वि ७ वांछितार्थस्यसंसिद्धिर्येनायासंविनालभेत् अन्यत्पुण्याधिकंकिंचिदस्तिसर्वंनिगद्यते ८ यावतोमुनयः
सिद्धाआषाढःसेवनादिह तत्संख्याशचयतेवक्तुंनापिवर्षशतैरपि ९ ब्राह्मणाक्षत्रियावैश्याःस्त्रियःशूद्रास्तथापरे
सर्वेषामधिकारोस्तितथाचाश्रमिणामपि १० लोकार्थिनोधिगच्छंतिलोकान्मनसईप्सितान् अपिमोक्षार्थिनामो
क्षआषाढस्नाननोभवेत् ११ जयार्थीविजयंचैवबलार्थीचबलोन्नतिम् रूपार्थिनोपिसौंदर्यंलभतेनात्रसंशयः १२
ईश्वरउवाच अगस्त्येनपुराराजान्नहुषोनामविश्रुतः विप्रियत्वकरंशीघ्रंपातितोवज्रभृत्पदात् १३ ततोदीनोवि

वर्णोसोमहत्यात्रपयायुतः कस्याप्याननमात्मीयंनदर्शयितुमीश्वरः १४ ततोगत्वावसिष्ठंसप्रणिपत्यमुहुर्मुहुः कृतांजलिपुटोभूत्वाप्राहगद्गद्यागिरा १५ स्वकीयाज्ञानतःपापंकृतंत्यत्रकुबुद्धिना यच्चद्विजाःकृतावात्यास्तेनमेदह्यतेपुनः १६ तेनेनसापातिनोहंगतोपिमघवत्पदात् निष्कृतिंकिंकरोम्येवनचशक्नोमिजीवितुम् १७ येनाहदुरितान्मोक्ष्येत्थंनसोत्यंतिदारुणान् तद्ब्रूहिमेमहाभागलभेयंतत्समीहितम् १८ नत्वाशरणमापन्नमासुद्धरमहामुने १९ इतिश्रीस्कंदपुराणेआषाढमासमाहात्म्येएकादशोऽध्यायः ११ ५ ईश्वरउवाच इतिसंश्रुत्यनद्वाक्यंवसिष्ठोमुनिसत्तमः कृपयापरयायुक्तोराजानमित्यभाषत १ वसिष्ठउवाच अविमृश्यनकार्यंहिकार्यंकिमपिपंडितैः भूमौनिसृष्टकार्यस्यविपाकोदारुणोमतः २ त्वयेद्रपदसंप्राप्तावौत्सुक्यात्साहसंस्कृतम् तत्कार्यंतस्यसंप्राप्तंफलमेवंविधंत्वया ३ कामादयःशरीरस्थामहांतःशत्रवोऽधमाः कार्यंतैरसत्कर्मपुरुषैःस्ववशीकृतैः ४ इहामुत्रचयेनासौनीयतेदारुणांदशां तस्मादेतेविजेतव्यालोकद्वयहितैषिणा ५ लोभेनत्वबलवताप्रापितोसीदृशीदशाम् चित्तसंशोकजननींसर्वलोकविगर्हिताम् ६ राजस्त्वंतपतींगत्वासर्वभोगविवर्जितः एकाग्रमानसोभूत्वाशृणुष्वास्यानंसमाचर ७ तेनत्वंगतपापस्फलप्स्यतेवांछितंफलम् नान्यःकोपिनवोपायोविद्यतेतत्रनिश्चितः ८ वसिष्ठउवाच पुराशतबलीराजाशत्रुणाच्यावितःपदात् पुनःस्वपदमापन्नआषाढस्नापनात्परः ९ नहुषउवाच एकःशतबलीराजाशत्रुणाच्यावितःपदात् राज्ञातुतत्पुनःप्राप्तंकथमेतन्निगद्यताम् १० वसिष्ठउवाच वंगानामधिपोराजाभवच्छतबलीपुरा ततस्त्वंगकलिंगाद्याजितादेशास्त्ववीर्यतः ११ सकदाचिद्ययौराज्ञाकामरूपेश्वरंप्रति युद्धंतत्रभवद्घोरमनेकसुभटक्षयम् १२ तस्मिन्राज्ञःसुबहवोमृताअश्वगजानराः मानुषाणांचपतयोबभूवुःसरितोवराः १३ यत्रत्वग्रुधिरस्रावात्पानमत्ताः पुनःपुनः नृत्यंतिस्मचगायंतिभूतवेतालराक्षसाः १४ यत्रायुध्यतसुभटात्यत्कामरणजंभयम् बाणैःकुंतैश्चखव-

ङ्गैश्चर्षिभिः शक्तिभिस्तथा १५ यत्नंशत्रोर्निग्रहायुग्रदृष्टाश्चक्रुरुत्तमम् उरीचकारमरणंरुभटानपलायनम् १६ शि
रोभिर्बहुभिश्चापिश्चन्यैरवयवैस्तथा पतितैःरुभयंकारैःरणभूर्दुर्गमाभवत् १७ वाजिवारणवीराणांदेहेभ्यःपतितक्षता
त् नदृश्यतेस्मकीर्णाभूरस्रुङ्मांसवसास्थिभिः १८ रुव्यादगणसंकीर्णंतदासीत्संगरंमहत् शूराणांहर्षजननंभीरू
णांभयवर्धनम् १९ इतिश्रीस्कंदपुराणेब्राषाढमासमाहात्म्येद्वादशोऽध्यायः १२ ७ सहोवाच
तस्मिन्महतिसंग्रामेवर्तमानेरुदारुणे कामरूपेश्वरबलसंग्रामाच्चपलायिनम् १ पलायमानंस्वबलंदृष्ट्वाराजाब्रवी
द्वचः क्षत्रियामापलायध्वंभोभोतिष्ठतनिष्ठत २ क्षत्रधर्मंपरित्यज्यपलाय्यकुत्रयास्यथ स्वीयधर्मात्परिभ्रष्टादर्श
यिष्यथकिंमुखम् ३ एषलोकःपरोवापिहितयवोविनश्यति पश्चादपिहिमर्तव्यमितिमत्वानिवर्त्यताम् ४ केलोका
वोभविष्यंतिपश्चाद्यदिमरिष्यथ इतिशूरावचःश्रुत्वानिवृत्ताःकेऽपितत्रवै ५ तैर्निवृत्यमृधंचक्रुर्दारुणंरोमहर्षण-
कामरूपेश्वरोराजायोधयन्परवाहिनीम् ६ ततःशतबलिंप्राप्तस्तयोर्युद्धमभूत्तदा परस्पराकर्षितयोः परस्परवधैषिणोः
७ कामरूपस्यसविभुः कोपामर्षवशंगतः अर्धचंद्रनिभाभ्यासनिशिताभ्यांमहाबलः ८ छित्वाधनुः शतबलिः
च्छत्रंचिच्छेदवीर्यवान् ततोन्यद्धनुरादायकोपाच्छतबलिःपुनः ९ दृढविव्याधहृदयेनाराचेनविरोचसा सोऽतिवि
द्धोबलवन्नारिपुणारिपुसूदनः १० मूर्छयागतश्चेतन्योरथोपस्थेऽपाविशत् तत्क्षणाच्चेतनाप्राप्यगृहीत्वात्वरितंधनुः
११ तस्मिन्क्षणेकामरूपीशिरश्चिच्छेदसारथेः ततःशतबलिःक्रुद्धोनिर्गतःसारथौहते १२ स्वयंरश्मिंसमादाययुयु
धेरिपुणासह नाराचास्तंतत्रादायरुक्तीक्ष्णांकंचुकच्छिदः १३ चतुर्भिश्चचतुरोवाहानवधीत्तस्यवेगतः पंचमेनतत-
श्चारुचिच्छेदःसारथेःशिरः १४ हतेष्वश्वेषुराजाससारथौचततोरथात् खड्गमादायवेशीघ्रंस्वखेटकमथाभ्यगात् १५
ततः शतबलिस्तस्यसर्वस्वमम्महीद्वलात् तंचादायततोराजागंगांप्रापमहायशाः १६ मौलोजघानखड्गेनतह्यताद्बुधि

रंवमन् मूर्च्छामवापतेनैवंविह्वलंपतितंभुवि १७ जीवग्राहंसजग्राहवाचानिर्भर्त्सयन्मुहुः सशत्रुवशमायातःकिं
चित्प्राप्तंचभाविनम् १८ ततःशतबलिस्तस्यछित्वासिमपितत्पुनः ततोनिवेशयामाससैन्यंगंगातटेबली १९ तत्राप-
श्यद्दधिवराश्चरतःपरमंतपः शुष्कपर्णाशनांकांश्चिद्वातोबुद्बुदकाशनान् २० महोपराकिणःकांश्चित्कांश्चिच्चांद्रायणे
रतान् तत्सर्वान्सनमस्कृत्यप्रत्येकंमहतोदरान् २१ तैःसर्वैःकुशलंपृष्टोराज्ञोदत्तास्तदाशिषः सनैरूक्षेपुनरिदंकृतं-
शतबलेत्वया २२ क्षत्रसद्दकर्मनैवकामरूपंयदग्रही क्षत्रियाणांजयोमृत्युः संग्रामेनपलायनम् २३ यत्नेनयुध्यतां
लोकेनदोषोस्तीहकश्चन क्षत्रधर्मपलायेच्चभग्नसैन्यस्ययोग्रहः २४ नासोपुण्यायराजेंद्रतस्मादेतद्धुतत्यज निश्चि
तोत्रजयः कस्यभंगोवाकस्यनिश्चितः २५ विजयःप्राप्यतेकैश्चिद्भज्यतेनत्वकर्हिचित् एतावन्निश्चितोयस्मात्ज्ञात्वेह
विजयेच्छुभिः २६ शत्रुर्विमदमापन्नोनकार्यश्चकथंचन संग्रामेपतितोवीरोजीवन्नपिमृतोपिवा २७ क्षमितव्यःसरि
पुभिःकोपामर्षौविहायच्च संग्रामेपतितंवीरंयेघ्नंतिघातयंतिवा २८ ब्रह्महत्यासमंपापंतेषांस्यान्मुनयोब्रुवन् युद्धेब-
द्धचाद्दतंचतवाहमितिवादिनम् २९ क्षत्रियायेत्वनिघ्नंतिब्रह्मघ्नास्तेप्रकीर्तिताः वैरिभिःस्वामिनंबद्धंत्यक्त्वाप्राणपरायं
णाः ३० क्षत्रियायेनिवर्तंतेतेषांहत्यापदेपदे यावज्जीवंस्वामिनोन्नंवित्तशस्त्राणिभूषणम् ३१ उपयुज्यायुध्यतांचगर्द
भास्तेभवांतरे शत्रुरप्यापदप्राप्तोनहंतव्यः कथंचन ३२ विपन्नोसप्रतीक्षःस्याद्यावत्तानूप्रतरेदिह याचनीतिरिनिग्राह्य
व्यसनेसतिसर्वदा ३३ प्रहर्तव्योविपक्षःस्यात्तथास्थापनयेसति प्रावाहिकतुवचनंनचेत्पारमार्थिकम् ३४ कर्म
वश्यजगदिदंयदवस्योहिमानवः कर्मायत्तोदृष्टकर्माकर्मायत्तःपराजयः ३५ बुद्धिःश्रीश्चसुखंदुःखंसर्वंकर्मानुगामि
च अन्यत्नकिंचिद्वक्षार्थेराज्यंस्यात्कस्यचित्पुनः ३६ स्फुरन्नंयातिकस्यापिसहसानदचिंतितम् यस्येवसर्वसौख्या

१०

१महत. आदरादितिच्छेद. संधिरार्ष. २ क्षत्रियः

निसंततिनस्यनरस्यच ३७ दृश्यतेसहसानाशः कथंकर्मनकारणम् सहसाचमहाव्याधेरागमः कस्यचिद्भवेत् ३८ धनाग
मश्चकस्यापिकथंकर्मनकारणम् कस्यचिच्चापदोदक्षासहसाप्यधनंतथा ३९ एतानीतिविनिश्चित्यकर्मकारणमुच्यते
अन्यदिष्टस्यतुगतिरन्यतेनचुनिश्चितम् ४० अतश्चव्यभिचारोहिदृश्यतेकर्मणोवशात् कर्मणस्तुवशात्पुंसांजायतेता
दृशीमतिः ४१ कर्मणाविषयेषिच्छातत्करोतिप्रयत्नतः दैवमेवहितस्माच्चमन्यामःपरमंवयम् ४२ दैवेनतत्तदाप्नोति
दैवेनचपरांशान्तिम् नधर्मवधमाप्नोतिनैरुज्यंचसरोगताम् ४३ लयक्षयादिकंचैवसर्वदैवेःप्रतिष्ठितम् असौदैवाच्चवि
पदंप्राप्तस्त्वंपितृजपदम् ४४ तस्मादेनंविमुच्याशुवसराज्येनयोगते ४५ इतिश्रीस्कंदपुराणेआषाढमासमाहा
त्म्येत्रयोदशोऽध्यायः १३ ॐ वसिष्ठउवाच ऋषीणांवचनात्सोऽथविमुच्येनमहामनाः मुनिनापृच्छविषया
न्सजगाममुदान्वितः १ कामरूपाधिपश्चात्रऋषिभिर्मोचितस्तदा विवर्णवदनोमर्षलज्जाशोकपरिप्लुतः २ गंगायाः
सलिलेस्नात्वाऽपृच्छचमुनीस्तथा निरंतरंश्वसन्क्षामोविच्छलीकृतचेतना ३ मानीमानंत्यजिनोहिवरान्प्राणान्-
परित्यजेत् ब्राह्मंसरोजगामाशुहित्वादारान्सपुत्रकान् ४ राज्यंससागरंत्यक्त्वाशोकामर्षवशंगतः कथंचिन्नृपिलोकानां
दर्शयत्यात्मनोमुखम् ५ तत्रस्थित्वाचिरंध्यौकिमत्रममसांप्रतम् जुहोमिखंडशःकृत्वावन्हौदेहमिमंकथम् ६ किंवा-
कंठेशिलांबध्वामज्जयामिनिजांतनुं अथवाभृगुतःपातंकृत्वाभिनविग्रहम् ७ अथवोग्रेणतपसाराधयामिमहेश्वरम्
ततश्चतपसाशीर्णंत्यक्ष्यामिचकलेवरम् ८ ततःसुतपऋारंभेविचार्यैनिमुहुर्मुहुः नित्यंत्रिषवणंकुर्वन्त्रिःकुर्वन्पूजयंशि
वम् ९ शिवमंत्रंजपन्नित्यंशिवध्यानपरायणः तत्रोटजेसमाधायवन्हिंचविधिपूर्वकम् १० त्रिवारंसमिधाहोमयज्ञिया
नांसमाहितः एवंकृत्वावदत्येवंशंकरःप्रियतामिति ११ संध्यायाश्चततःसांध्यंकृत्वंकृत्वासमाहितः स्थापितृतर्पणांतेच
आहारंकुरुतेवशी १२ एववर्षत्रयंसायंजातस्यचमहात्मनः अथैकस्मिंदिनेराजामध्यान्हस्नाननिर्गतः १३ एवंसनिमृ

टीप १ नयागते-नित्याऽऽगतेप्राप्ते-

गः कश्चित्तत्समीपंसमागतः हिंसकव्याधसंत्रस्तोसुंचस्केनमुहुर्मुहुः १४ पश्चाद्विलोकयन्भूपंकंपमानोभयातुरः राजा-
नंदीनवदृष्ट्वात्वीक्षतेचाग्रतःस्थितः १५ नृपोपिकृपयाविष्टोदृष्ट्वामृगमभाषत माभैमृगपरित्राणंप्राणैरपिकरोमिते १६ एवं
वदतिभूमीशेतत्रव्याधाःसमागताः साधिज्यशरधन्वानोमार्यतांमिनिवादिनः १७ संप्रापुस्तेथराजानंसमृगंबलवर्धितम्
ऊथोचुरथराजानंमृगःसोयंमदीयताम् १८ तपस्विनोनयुक्तंस्तेहरणेपरवस्कनः अथवानतपस्वित्वंकपटीपश्यतोहरः
१९ एतत्कृतेवयंभ्रांताम्रष्टव्याश्चदिनावधि यावताधानयामस्तेतावद्भूपहास्तिकिंछलात् २० नूनंहंतुमशक्तस्त्वंकपटेन-
जिघांससि ततंतवमुनित्वंहिमृगार्थीक्रियतेत्रयत् २१ अस्माकंमिषतांचायंकुरंगःकेनलक्ष्यते अधिलंबेनदेत्येनंविलं-
बस्तवदारुणम् २२ इतिश्रीस्कंदपुराणेआषाढमासमाहात्म्येचतुर्दशोऽध्यायः १४ ऋ वसिष्ठउवाच
इतितेषांवचःश्रुत्वाराजागर्वसमन्वितः प्रत्युवाचततोदात्तस्वरेणतर्जयन्निव १ यादृशाः पापिनाःपूर्वंतादृशंवचनंहिवः अ-
थवाहृदयेयावत्तादृग्वाचिप्रवर्तते २ यद्यहंनतपस्वीस्यांमाभूवंविमतेनकिम् नक्षमत्यपिरक्षत्रंचांडालंशरणागतम् ३
गृहीतुंनगतोस्मेनंमयानाकारितोत्र्यसौ अतर्कितःसमायातःशरणार्थीभयातुरः ४ जीवत्कथंत्यजाम्येनंमृत्योर्भीतंक्षुद्र-
जंतुकाः परार्थेचवरान्प्राणान्दुस्त्यजानपिसत्यजेत् ५ मन्यमानोबहुप्राणान्यस्त्यजेच्छरणागतम् स्वल्पगतेषुप्राणेषु
स्थितंतत्त्यागपातकम् ६ शरणागतार्थेतत्प्राणास्त्यजेद्यस्त्वविचारयन् स्थापयित्वानुविपुलांकीर्तिस्वर्यातियन्नरः ७ य
त्रेंद्रादिपदप्राप्तिर्मरणेमोक्षएवच इहकीर्तिश्चविपुलातत्रकास्तिविचारणा ८ नलाभोयत्रकोपिस्यात्परतस्यचदुर्गतिः
नतन्मरणमन्विच्छेत्तत्रात्मारक्ष्यएवहि ९ इतिमेनिश्चयंदृष्ट्वाकुर्वतोममघातनम् मृगोमाहन्यतांव्याधअत्रनास्तिविचार
णा १० इतिनस्यवचःश्रुत्वाव्याधाऊचुरनंतरम् व्याधाऊचुः अहोवेत्सितपस्वीत्वंतनुत्यजसिकिंवृथा ११ स्वकर्मकु
र्वंस्त्वत्कालंजीवतर्हिशतंसमाः विचारमूढोनखलुमृगार्थंजाधितंत्यजेत् १२ रक्षणेनमृगस्यास्यपुण्यंयत्तद्दिनेदिने न-

१ ततःउदात्तःसंधिरार्षः २नोपेक्षते:

तप्यमानस्यचतपस्तस्माद्रक्षनिजांतनुम् १३ मृगस्यरक्षणेकिंस्यात्पुण्यंवाचात्मघातिनः तत्पापंभविनायत्रभोग्यंवर्ष
शतैरपि १४ भक्ष्याहिपशवःपुंसांतदर्थंम्रियतेऽत्रकः साधकःदेवपित्रर्थिकथंतद्धनंविना १५ रक्षानास्त्यहिनावत्तेन-
जीवन्स्वभागयम् निहतःपितृदेवार्थंप्राप्तोपित्र्यंदिवंपशुः १६ हत्वेमंहव्यकव्यार्थेदास्यामस्तद्विजन्मनाम् तदर्थंह
व्यकव्यत्वंतावत्स्वर्गंप्रयातिहि १७ अथत्वयामोचितोऽयमात्मदानेनचापरे निहनिष्यत्यतत्कालेनकिंवानेमृगांतकाः
१८ मृगार्थेम्रियमाणस्यकिंपुण्यंतेभविष्यति तस्माद्दुराग्रहंमुंचत्यजत्वंमोहसंभवम् १९पौनःपुन्येनात्रवयंब्रूमस्तत्थितका-
म्यया करिष्यामोयथाकामंमृगार्थिनो वयंखलु २० इतिश्रीस्कंदपुराणेब्राह्मेषाढमासमाहात्म्येपंचदशोऽध्यायः १५

ऋ वसिष्ठउवाच इतिव्याधवचःश्रुत्वाप्राहराजाहसन्निव मत्थितेचेन्निकर्षोत्रतर्ह्ययंक्ष्यतांमृगः १ तस्मात्स
रतंनास्तिमद्धितलुब्धकाःखलु मयापिरक्षणीयोहिचेतसेदंविनिश्चितम् २ किंप्रयोजनमत्रास्तिपश्चान्मरणशंकया
विनंक्ष्यतीतिकृत्वायद्रक्षणीयनरक्ष्यति ३ अथवाकिंनरक्ष्यःस्याद्यज्ञार्थमाहृतःपशुः रक्षणेयदिशक्तिःस्यात्तदाकप्रति
रोधिनः ४ यज्ञार्थेपितृदेहस्यक्षनःशफकृतेःकिल विश्वामित्रेणचकथंस्वप्रभावेनरक्षितः ५ तद्रक्षणेश्चतत्प्राणैःपरप्रा-
णयशोर्थिभिः नातःपरतरंलोकेपुण्यमस्तीहकिंचन ६ शिबिरौशीनरोरक्षन्स्वदेहेनकपोतकम् विस्तार्यहयशोराशिंस्वर्ग-
लोकमितोगतः ७ तस्माद्व्याधामृगस्यास्यनिष्क्रयोपाद्यतांद्रुतम् वक्रभावंपरित्यज्यमयिकृत्वास्थिरंचित्ततां ८ ततस्तम
वदद्व्याधायत्वयैवविनिश्चितम् अस्मांस्त्वंस्वशिरोदेहिमृगस्यास्यहिनिःक्रियः ९ ततोराजाहृष्टमनागृह्यतांमच्छिरोद्रुतम्
इत्यब्रवीत्ततान्व्याधान्सर्वांश्चपरितस्थितान् यावद्यातिमृगोत्यस्मात्तावत्कालंप्रतीक्ष्यच एवमुक्ताततोव्याधामृगंहित्वा
तुदूरतः ११ मुमोचराजायेनासोक्षिप्रंयातोवनांतरम् व्यावृत्याथततोराजाप्याययौव्याधसन्निधौ १२ गृहीतमच्छिरोव्या
धा विलंबोमाभवेदिह ततस्तस्यवचःश्रुत्वाप्रत्यभाषतलुब्धकाः १३ नवयंतापसंहन्मोनोदासीनमनस्त्रिणम् आयुष्य

हानिभीतंचनवाहमिनिवादिनम् १४ तस्मात्वंस्वयमुत्कृत्यस्वशिरोदेहिनःकृते सत्येननिष्क्रयंचास्यमृगस्ययदिमन्यसे
१५ ततस्तेभ्योथयाचित्वाराजास्त्वंतीक्ष्णमात्मनः प्रचक्रमेनिजशिरःकर्तितुंनिजकारणात् १६ एतस्मिन्नंतरेदेवोभगवा
शशिशेखरः आजगामगणैःसार्द्धंपंचास्योदशबाहुकः १७ अथात्माचनृपंप्राहमाकार्षिःसाहसंनृप तुष्टोस्मीतिवरं
ब्रूहियत्तेमनसिवर्तते १८. इत्युक्तंचराजानंछिंद्वानंस्वशिरःकरैः जग्राहाथमहादेवस्तद्वृत्त्यात्तमानसः १९ यावत्स
मीक्षतेराजातावदग्रेनलुब्धकाः ददर्शश्रीमहादेवंदेवदेवमुमापतिम् २० दृष्ट्वाथशंकरंराजास्वसमीपमुपस्थितम् जा
नुभ्यामवनिस्पृष्टाप्रणामपुनःपुनः २१ नत्वापुनःपुनर्भक्त्यास्तोत्रमेतदुवाचह राजोवाच नमस्कृभ्यंभगवतेवा
लचंद्रार्धधारिणे देहार्धेबिभ्रतींदेवीं पार्वतींतेनमोनमः नमस्तेकालकूटायनीलकंठायतेनमः २३ अष्टमूर्तेनमस्तुभ्य
नमस्तेकामहारिणे नमःकालाग्निनेत्रायशंकरायनमोनमः २४ नमोब्रह्मस्वरूपायनमस्तेविष्णुरूपिणे नमोमहेश
रूपायसर्वदेवात्मनेनः २५ पुरोभिदेनमस्कृभ्यंदक्षाध्वरविनाशिने परापरस्वरूपायसृष्टिसंहारहेतवे २६ सर्वज्ञायन
मस्कृभ्यस्थूलरूपधरायच नमस्तेसूक्ष्मरूपायअरूपायनमोनमः २७ नृत्यप्रियायदेवायभूतानांपतयेनमः नंदिवाह
नमस्कृभ्यंनमस्तुभ्यंदवीयसे २८ वर्षीयसेनमस्कृभ्यंमहिष्ठायनमोनमः गृहीतरजसेविश्वंसंभवेमृडरूपिणे २९
रूपायसंहारहेतवेतेनमोनमः सत्वोपेतायरक्षायानिस्त्रैगुण्यशिवायच ३० नमोनमोमहादेवप्रसीदपरमेश्वर इतिस्कृत
स्तदाराज्ञादेवदेवोमहेश्वरः ३१ प्रसन्नवदनःप्राहब्रूहिमत्तोभिवांछितम् ततोऽसौप्रणिपत्याह शंकरंलोकशंकरम् ३२
वचसःकारणंसर्वंचिरसत्दिसंस्थितम् राज्ञाहंशनबलिनापराभूतःपुनःपुनः ३३ स्वपदात्याजितस्तस्माद्याचेत्वामेत
देवहि एतस्यस्वपदभ्रंशोयावज्जीवंभवत्विह ३४ तपोभिर्यजनैश्चैवतीर्थैबहुविधैःकृतैः स्वपदस्यपुनःप्राप्तिर्मांभूदे
तद्धियतांम् ३५ यद्याशृणोमिसततंपदभ्रष्टंसदेवहि तस्यैवंवचनंश्रुत्वाप्राहदेवोजगद्गुरुः ३६ आषाढसवनंकृ-

त्वातपत्यांसर्वकामदम् अन्यःसर्वैरुपायैस्तकस्कृतैरपियत्नतः ३७ ननस्यपदसंप्राप्तिःकथंचनभविष्यति तवस्वप
दसंप्राप्तिर्भविष्यतिपुनस्तथा ३८ अतोममपदावाप्तिर्भवित्रीनवभूमिप इत्युक्त्वादेवदेवोऽपिनत्रैवांतरधीयत ३९
राजापित्वपुरंप्राप्यलब्ध्वाराज्यमकंटकम् पूर्ववन्मुमुदेतत्रशंकरस्यप्रसादतः ४० इतिश्रीस्कंदपुराणेआषाढमा-
समाहात्म्येषोडशोऽध्यायः १६ ७ वसिष्ठउवाच कामरूपेश्वरोयावच्छक्तिमान्सैन्यसंयुतः प्राप्तिष्ठतबलिं
शीघ्रंपूर्ववैरमनुस्मरन् २ तावद्राज्यंपरित्यज्यसप्तांगनिर्गतःपुरात् सतस्माद्दुर्जटिवराद्राज्यभ्रष्टोऽप्यजायत २ भ्रम
न्महींत्रिसकलाशोकामषसमन्वितः भ्रष्टराज्योगतश्रीकोनाविदन्वस्करवंकचित् ३ गिरिशस्यप्रभावेणपातितःस्वपदाद
पि किंकरोतिनकोप्यस्तियोरुद्रेणविरुध्यते ४ पृष्ठोपिदशनायेनपातितोहितथाबलात् वज्रिणास्तोभितवज्रक
स्तेनस्पर्धयेदिह ५ इद्रादिपददातात्रतस्मादन्योनविद्यते वराभिधारिणोदेवदैत्यदानवपन्नगाः ६ गिरित्वरितमा-
साद्ययस्यद्वारमुपासते आराधनाच्चयस्मात्तेस्वानिस्वानिपदानिच ७ लभंतेतत्रशक्नुवंतेमहिम्नायत्प्रसादतः यो
ददात्यत्रसर्वेशःपदानिसमहांत्यपि ८ सत्रेसदाऽध्वर्यवनिविषादःकियतेऽक्रूरः सदुस्थजनवज्जानपादचारीगतानु
गः ९ व्यपेतकानिर्निर्भूनिरेकाकीनिःश्वसन्मुहुः तदाभाविनिकल्याणीमार्कंडेयाश्रमंययौ १० दृष्टःसतुमुनिस्तेन
कृतानिष्यउपाविशत् नमस्कृत्यमुनिंसोथकृतांजलिपुटस्थितः ११ मार्कंडेयेनसंपृष्टःकिमूलव्यसनंतुते कस्मात्व-
मिहसंप्राप्तोराजन्नेवंविधांदशाम् १२ कतेगतंमहद्राज्यंकचनेमत्तदंतिनः कतेलक्ष्मीः कतेऽमात्याःसहायाःकचते
गताः १३ सर्वमेकपदेभ्रष्टंस्वप्नेदृष्टंप्रबोधवत् धिक्संपदोमहाकष्टैरर्जिताःक्षणभंगुराः १४ सत्कर्मवशगास्ताहि-
कर्मवापिक्षयात्मकम् सतीषुतासुगर्वोननविषादोगतास्तच १५कार्योनचिंतापरमाचंचलास्तानिरंतरम् वसिष्ठउवाच
इत्युक्तस्तुततोराजामार्कंडेयेनधीमता १६ सर्वंनिवेदयांचक्रेस्वराज्यभ्रंशकारणम् कृतमाराधनंशोकामरूपाधि-

पेनतु १७ जितेनशत्रुणायद्वत्तोषितोभगवान्हरः तस्माच्चतद्वरप्राप्तिंसर्वमेवन्यवेदयत् १८ विनयावनतोभूत्वापुनःपप्रच्छतंमुनिम् महर्षेऽथमहेशोनस्वपदाद्भ्रंशितःकथम् १९ अध्यापनंमहेशस्यनमयाविहितंक्वचित् जगत्यांबहवस्तस्यशत्रवःस्फुटदोऽपिच २० अपवर्ज्यजगत्सर्वंनिःकृपोभूत्कथंमयि वसिष्ठउवाच इतिनस्यवचःश्रुत्वाप्रत्यभाषतंमुनिः २१ क्षणंध्यानपरोभूत्वाज्ञात्वातेनपुराकृतम् २२ इतिश्रीस्कंदपुराणेआषाढमासमाहात्म्येसप्तदशोऽध्यायः १७ ६ मार्कंडेयउवाच राजज्ञानामितत्सर्वंयत्त्ववदसिबुद्धिमान् ईश्वरःफलदातास्तिकृतकर्मानुसारतः १ जन्मनीतस्तृतीयेत्वंराजाभूद्गौडमंडले ततस्त्वयाप्रमत्तेनब्राह्मणःपातितःपदात् २ तस्यसर्वंत्वयानीतंदेशान्निष्कासितःसच ततस्त्वंतेनपापेनमृतोनरकमाप्तवान् ३ बहुकालंतत्रदुःखंभुक्त्वानिष्पापतांगतः पूर्वपुण्यानुसारेणजातस्त्वंब्राह्मणस्ततः ४ तत्रतप्तंतपःकष्टंबहुंश्चपरिवत्सरान् गंगातटंसमाश्रित्यकालिंद्यायत्रसंगमः ५ ततस्तत्रैवनिधनंप्रपन्नःकालपर्ययात् तपसादुष्करैर्णैवजर्जरंचकलेवरम् ६ तपसःप्रभवैःपुण्यैःगतस्त्वंविष्णुसन्निधौ तत्रस्थितश्चिरंरममाणोयदृच्छया ७ ब्राह्मणाभिभवाज्ज्ञातंपापंयत्तस्यशेषतः विष्णुनाप्रेषितोभोक्तुंपुण्यशेषंनृपोऽभवं ८ यत्त्वयापापितोविप्रःस्वपदात्पूर्वजन्मनि तत्कर्मणःफलंत्वेतत्स्वयंयच्चसमागतम् ९ तन्नदेवानमनुजाददतेस्वदुःखयोः कारणंकेवलंकर्मयत्कृतंपूर्वजन्मनि १० इशस्तदनुसारेणफलंयच्छतिदेहिनाम् अल्पंवायदिवानल्पंशुभंवायदिवाऽशुभम् ११ एतदाकर्ण्यवाक्यंसमहर्षेःसारवत्तरम् राजाविज्ञापयामासनंमुनिंसर्वतोगतिम् १२ भगवन्कोऽप्युपायोऽस्तियेनस्यात्सुखभागहम् एवंगतेमहाभागयद्यस्तीतन्निगद्यताम् १३ इतिविज्ञापितस्तेनपुनर्ध्यानपरोभवत् प्रणिधानेनतज्ज्ञात्वोपायंचाकथयत्तदा १४ राजस्त्वंतपतींगत्वाआषाढस्नानमाचर तस्मादुपायोनास्त्यन्यःस्वपदप्राप्तयेनव १५ कृतेचाषाढसवनेपरिपूर्णेकृतेद्विजैः निश्चितंस्वपदप्राप्तिस्तवराजन्भविष्यति १६ निरु-

पायपदभंशोकामरूपाधिपेनने भगवानपिभूतेशोभाव्यमानःपुनःपुनः १७ तपत्याषाढसवनंवर्जयित्वावरंददौ समाधि
नामयाहष्टएषोर्थः कथितस्तव १८ संपादयैनंराजेंद्रयदिस्वपदमिच्छसि इत्युक्तस्तेनमुनिनामार्कंडेयेनभूमिपः १९ त-
माप्यह्वानमस्कृत्यगृहीताशिस्ततोवशी ययौससत्वरंतापीमाषाढस्नानहेतवे २० दृष्ट्वातापींनमस्कृत्यतुष्टावसवितुःसु
ताम् जगतःपापकोद्घोघप्रक्षालकपटूदकाम् २१ हिंस्रैर्जुष्टानिसततंसंहतैर्वनवासिभिः तानिपीत्वाचचाभांसितृष्णाक
स्यभवेत्पुनः २२ पीड्यमानान्नरान्दृष्ट्वानितांतंपापकर्मभिः तेषांपापविनाशायजानामित्वामिहागतः २३ कामधुक्
श्रूयतेयत्रसापरास्करकामधुक् सर्वेषांत्वंतुलोकानांकामदासिमहानदि २४ यदापरास्तरंगिण्योज्ञायंतेस्पर्शनाक्षमाः
त्वदबुस्नानमाहात्म्यंत्वदत्यर्थंविशिष्यते २५ यदाषाढेनवजलैःपूताःकेतत्रमानवाः यथाभिलषितंप्राप्तानकामरविनदू
ने २६ नामृतत्वंकिलभतेतवाषाढनिषेवणात् अमरत्वंनराःप्राप्यक्रीढंतित्रिदिशैःसह २७ इतिस्तुत्वाततोदेवींतापी
दिनकरात्मजाम् आषाढमासस्वनंराजाकर्तुंप्रचक्रमे २८ इतिश्रीस्कंदपुराणेआषाढमासमाहात्म्ये अष्टाद
शोऽध्यायः १८ ७ वसिष्ठउवाच ज्येष्ठस्यैवदशम्यादौकृत्वाथविधिपूर्वकम् संपूज्यतपतींदेवींभक्त्या
परमयान्वितः १ प्रातर्मध्येतथासायंविदध्यस्नानमादितः सचिंतयन्स्थिरतंसूर्यमंडलगंहरिम् २ कमलासनसंस्थं
चचारुहासहिरण्मयम् केयूरकुंडलोपेतंशंखचक्रधरंविभुम् ३ पूजयित्वाततोभक्त्याविष्णुंतद्गतमानसः विष्णुपा
दोदकात्रौतुलसीदलसंयुतम् ४ चकारभोजनस्थानेसंध्योपासनपूर्वकम् एवंतेनकृतेराज्ञात्याषाढसवनंपरम् ५
आषाढीपौर्णिमायाचविधिवत्सयतात्मनः ततःपुराणपुरुषःप्रत्यक्षःप्राहतंनृपम् ६ कृतंशतबलेस्नानंमत्पूजनस-
मन्वितम् तुष्टोस्मिकिंफलंतेस्कस्नानादस्मात्तदुच्यता ७ शतबलिरुवाच तुष्टोसि यदिदेवेशपुराणपुरुषो
त्तम ममस्वपदसंप्राप्तिर्भविष्यतियथापुरा ८ श्रीभगवानुवाच अंतेचमत्पदावाप्तिर्भविताचनसंशयः कृ-

तंत्वयायत्स्नवनमाषाढेतपतीजले९तेनपूर्वकृतात्सापाद्विमुक्तोसित्रिभिर्दिनैः शेषैरहोभिर्नृपतेयदिच्छसिकरेऽस्तितत्
१० ताप्यामाषाढकर्तृणांदुर्लभंनास्तिकिंचन इत्युक्त्वाभगवान्देवः कर्मणांफलदायकः ११ अंतर्दधेसविश्वात्मात्रैलो
क्यव्यापकोहरिः राजापिपरमानंदस्वरूपंतमवेक्ष्यच १२ रोमांचितश्चहर्षाश्रुपूर्णदृष्टिरजायत अंतर्हितेभगवति
स्मिन्देवेजनार्दने १३ सोपिस्वनियमपूर्णेविदधेस्नपनस्यच तत्स्वस्वपुरंगत्वास्वराज्यंप्राप्यपूर्ववत् १४ तथैवदुस्तर
तरोरिपूणासमपद्यत तपत्याश्चप्रसादेनविष्णोःसालोक्यतांययौ १५ विष्णोराराधनेनाशुप्राप्यतेकिनदुर्लभम् ज्ञा
त्वाषाढप्रभावोऽस्तिसस्नोसप्तनिवत्सरम् १६ आगत्यागत्यनियतोनियमाच्छ्रद्धयान्वितः १७ स्नानेसचादोपरमेत-
पत्यामाषाढमासस्यमहाप्रभावे राजाभृशंकांतिसमन्वितोभूत्संपूर्णबिंबः शरदीवसोमः १८ आषाढमासस्नपनेन-
सर्वैः पापैर्विमुक्तः सभृशंबभाषे ऐंद्रोगजःपल्वलकर्दमाक्तः संप्राप्यसेंद्रोसलिलान्वितस्याः १९ ततोमहेंद्रोनृ-
पतिंबभाषेत्वमेहिराजंस्त्रिदिवंव्रजामः ताप्याजलैरप्यघपुंजदाहतीव्रैःपवित्रीकृतविग्रहोऽसि २० दिवंसमा
गत्यचभुंक्ष्वभोगास्त्वयोत्तमैःकर्मभिरर्जितांश्च धन्योऽसिराजन्नितिपश्यहेतोः करासमस्तावस्कधासमेताः २१
राजामहेंद्रंतदनुप्रणम्य कृताजलिःप्रश्रयवानवादीत् अयंप्रसादोभगवंस्तपत्यास्त्वयानुकंप्योयदहंबभूव २२ ह
स्तेऽस्तिपीतप्रसभांबुराशिर्वाग्मात्रसंस्तंभितविंध्यपर्वतः अनुग्रहस्तेममकुंभयोनिर्मोभूशायामासपदात्स्वकी
यात् २३ सर्वंस्करायेनममप्रसन्नामानेतुमूर्वीतलमागताश्च धन्वीकृतोऽहंसहपूर्वजैस्तैःकृतोऽन्यथास्यादिः
तिसप्रतिष्ठा २४ इतिवचनमुदारशक्रमुक्तानृपोसौतरणिकिरणवर्णाक्षिप्रमारुह्यदत्तम् सकलसुरविनेत्राऽभी
तिभाजाविमानंसहविबुधसमाजैःस्वर्गलोकंजगाम २५ कथितमितिकथाचेद्वत्समाहात्म्यमेतद्दिनकरतनयायाः
स्नानतोजायतेतत् व्रजहितशर्चिमासेनीरदायानहेतौधिकचजलजनीपेकेकिकेकातिरम्ये २६ इतिश्रीस्कं

दपुराणेरुद्रस्कंदसंवादेऽाषाढमाहात्म्येएकोनविंशोऽध्यायः १९ ऽ ईश्वरउवाच द्वावभूतांपुराविप्रौ शूद्रवंशसमुद्भवौ पशुक्रीतश्चरक्रीतनामभ्यांविदितौभुवि १ बालभावात्तयोः प्रीतिरवर्धतदिनेदिने समानशीलव्य सनौस्वभावेपिस्वदृक्तयोः २ तयोःपरस्परंप्रीत्यादद्तोःप्रतिगृण्हतोः भुंजानयोर्भोजयतोसभ्रीचोःसततंतयोः ३ गुत्यकथयतोश्चापिपृच्छतोश्चपरस्परम् वर्धमानाधिकंप्रीतिर्दिवसेदिवसेभवत् ४ पतितैःसहसंसर्गैः स्त्रीषुलंपट योस्तयोः नास्तिकानांचसंयोगाद्बभूवपुण्यनाशनम् ५ तत्सर्गवशात्तौतुनास्तिकंधर्ममाश्रितौ लोकद्वयभ्रंशकरंम हामोहसमुद्भवम् ६ एवंविधानिवाक्यानिश्रूयंतेतत्रपापिनाम् परस्त्रीपरवित्तेषु प्रसक्तानांसुरासुच ७ नास्तिपु ण्यंचपापंचनिग्रहोयंनिरात्मकः भूतानांसमवायोथयेयत्रचैनकारणम् ८ नास्तिचातःपरोलोकःतदर्थीकाःक्रिया- जनाः यत्प्रत्यक्षंतदेवास्तिनास्तितद्वृद्तोन्यथा ९ यत्वाद्यतेपीयतेचसुरवंयदिहभुज्यते तदेवसत्यमपरंसर्वमि थ्यावधार्यताम् १० मृतःस्मरतिभुक्तंचयच्चदृत्तंस्वबंधुभिः यानिस्वर्गेचनरकमित्येताधूर्तकल्पनाः ११ आश्रमा जीवितार्थायकेशस्कपरिकल्पितः आत्मस्त्रीद्रव्यरक्षार्थेनरकेभीषयंतिच १२ देहाद्यदिपरोह्यात्माछिन्नदेहेकथं नसः दृश्यतेक्वापिगच्छन्वात्तस्माद्दात्मीयचापरः १३ नास्तिप्रमाणंप्रत्यक्षान्नापरंतच्चमृत्फलः अन्योमोक्षःसत्यव द्भिर्दृष्टोलोकायतैरपि १४ साधारणेमनुष्यत्वेकेयंवर्ण वयस्थितिः किमभक्ष्यंचभक्ष्यंचतद्भक्ष्यंयच्चरोचते १५ सर्वभोग्यंचयद्वस्तुरमणीयमविश्रुतम् रममाणस्यतस्मिन्केपापपुण्येःविजानताम् १६ परोपकारःकर्तव्यइ- तिचेच्छास्त्रनिर्णयः स्त्रीणामनुपकारःकिंरक्षयाक्रियतेबुधैः १७ इत्यादिवाक्यैर्लोकानांमोहयंतौभृशंततः संसत्सुविदुषांभावावेष्णवाविनिवादिनौ १८ रात्रौयदृच्छयापीत्वागणिकावदनासवम् प्रातःस्नात्वाधौतवस्त्रे परिधायाऽहितेसिते १९ मृत्सिंडलांछितेभालेबाह्वोरुरसिकंठके पवित्रपाणीजपतस्तौमिथ्यामौनधारिणौ २०

प्रतारयामासतुस्तोदंभोनेतिसदाजनान् चक्रतुःसततंपापाचभक्ष्याणांचभक्षणम् २१ अगम्यायागुरोर्भ्रातुःपत्न्या संगमनेरतौ परस्त्रियोंत्यजाद्यायास्तयोस्ताभ्यस्वयोषितः २२ महाप्रतिग्रहरतौमहातीर्थेषुतेषुच रजकादिगृहेभुक्तंगुप्तंताभ्यायदृच्छया २३ तदाकलियुगस्यासीन्न तादृग्प्रसरोन्यथा एवंकलियुगेवेत्ताकथंस्यादितिशेषतः २४ नयकोशांतकोराजायत्रपापरताजनाः एकपाद्यत्रधर्मोपिनसत्ययत्रदृश्यते २५ पाखंडप्रसरोयत्रनकोशाश्वश्रुतिक्रियाः तस्मिन्युगेसदाचारोकेनापिनचदंडितो राज्ञःपुण्यवतोभावात्शस्त्रतोदंड्यदंडिनः २६ नकिंचित्पातकंनास्तिताभ्यायत्रकृतंपुनः संततिर्ननपोरासीद्वारसंसर्गिणोः सदा २७ ततःकालेनकियतापश्चक्रीतोगतोवनम् हंतुंमृगान्वागुरिकैःसार्द्धंमांसस्यभक्षणात् २८ तत्रव्याघ्रात्सविपदंप्रापपर्वतमस्तके नाग्निक्रियासमभवन्नक्रियाचोर्ध्वदेहिकी २९ इतिश्रीस्कंदपुराणेरुद्रकार्तिकसंवादेआषाढमासमाहात्म्येविंशोऽध्यायः २०

ईश्वरउवाच ततोसौकिंकरैर्नीतोहत्वाबध्वायमालिकम् ज्ञात्वायमेननत्कर्मरौरवंपातितस्तदा १ यदाताम्रमयीभूमिर्वन्हितापेननापिताम् वन्हिज्वालासमाकीर्णांदृष्ट्वाप्राणापहारिणीम् २ योजनानांसहस्रेद्वेदीर्घांसाहस्रमायताम् गर्तंतुसार्द्धपुरुषायामिनींदुःखदायिनीम् ३ तत्रलोहमयैरुग्रैःश्वभिर्लोहैस्तपादयोः बध्वाक्षिप्तोपिबहुशोवितपन्यमकिंकरैः ४ ततोदग्धंसमस्तत्वक्कलोदनासमजायत शुष्यमाणोस्तमांसास्थिःसंजातबहुवेदनः ५ उपरिस्थैःकिंकरैश्चहन्यमानःपुनःपुनः घटिकार्धंस्वरवमपिनस्यजातुनचाभवत् ६ स्मरन्घोरनिजकर्मनास्तिकाद्यव्यधीयत नापश्यच्छरणंतस्यकिंचिद्दुःखस्यमोक्षणे ७ अहर्निशंचिंतयंश्चनचोपायंसपश्यति भृशंरुरोददुःखार्तोपात्यमानोनिरंतरम् ८ जीवन्निरुक्तंकर्मकर्मस्वविद्यतेकथम् आत्मानंप्रत्फपालभोनैचचदानिसर्वदा ९ एवंनिरयेमग्नोभुंक्तेकष्टंस्वकर्मतः अथासौखरमित्रोपिस्वमित्रंपंचतांगतम् १० श्रुत्वाव्यलप

१ अकारि

दत्यर्थंशिथिलोजीवितोभवत् कियद्दिनानिशोचित्वापश्चात्स्वस्थोऽभिजायत ११ तथैवचनिजंकर्मपापरूपंचकार-
: तत्रतत्रतदायातियत्रलोकाःकुमार्गगाः १२ भोजनाच्छादनस्त्रीभिस्तत्सत्कुर्वंतिभक्तितः तदादेशाच्चतेसर्वेभुंज
तेस्त्रीपरस्परम् १३ निःशंकाश्चमिथोच्छिष्टंखादंतिचपिबंतिच वर्तमानःसइत्येवंकदाचिदाव्रजत्पुरात् १४
सदूरंवर्त्मनिस्तेनैर्निर्घृणैर्वित्तस्यकारणात् तस्यापिनाभवत्कापिदाहाद्यावैदिकक्रियाः १५ तथैवकिंकरैर्बध्वासोऽपि
नीतोयमातिकम् पशुक्रीतस्तुयत्रासीत्तत्रैवयमशासनात् १६ सोपिक्षिप्तोभृशंक्रूरकिंकरैर्विलपन्मुहुः हन्यमानै
र्महाघोरैर्नरकेमिलितोपुरः १७ निंदंतौस्वकृतंकर्मक्रंदंतौचपुनःपुनः क्षुत्तृड्भ्यांयुध्यमानौतौपतितौदुःखसागरे
१८ अत्यर्तावल्पचैतन्यौदत्यंतौरौरवाग्निना साहंकारपदैर्दीनौताड्यमानौप्रतिक्षणे १९ सत्यक्षमानौदुर्वाक्यैः
कंपमानौभयातुरौ नरकातमपश्यतांवर्षाणामपिकोटिभिः २० मर्त्यलोकेसुखमभूत्पापकर्मप्रकुर्वताम् तद्विपाको
महादुःखकारकोनरकोऽभवत् २१ स्यादत्रपापिनांसौख्यंपापंकर्मप्रकुर्वताम् तेषांतुनिरयेकष्टःपरिपाकोदुरत्य
यः २२ पुण्यकर्मकृतालोकेकष्टस्याच्चपदेपदे अत्यंतसुखसंप्राप्तिःस्वर्गलोकेतुजायते २३ पापकर्मकृता-
तेषांतत्क्षणाद्युपपद्यते फलपाकेमहादुःखंयत्रकल्पायतेक्षणः २४ अर्थहीनपरलोकेसुखंक्षणिकमेवच जी-
वितंचंचलतरंसर्वेजानंतिमानवाः २५ कामादिकैस्तथाप्येतेजानंतोपिबलादिह कार्यतेकर्मकिमपि दुस्तरंयद्यु
रपि २६ यारक्षकितभार्यातुत्यक्त्वास्वान्सपितुर्गृहे सत्संगतिवशात्साचनपापांतिकमभ्यगात् २७ तस्याःस्वजन-
कोविप्रःपुण्यकर्मपरायणः श्रुतिस्मृतिपुराणार्थंपापाद्दूरेपथिस्थितः २८ तद्गृहेसास्थितासाध्वीसर्वथाविजितेंद्रि-
भवातरकृतंकर्मनिंदंतीस्वपतिंनिजंच २९ तत्रस्तुस्वपतिंश्रुत्वामृत्योर्वशमुपागतम् विकेशाव्रतिनीभूत्वातपस्ते
पेसुदुष्करम् ३० परिधत्तेनवसनंरक्तंचव्रतधारिणी स्निग्धस्नानंनकुरुतेभूशय्यापत्रभोजनी ३१ मासोपवासान्कु

रुतेकृच्छ्राणिविविधानिच एवंकालंनियंतीचतपैश्चविविधैरपि ३२ सायद्वर्त्तारमुद्दिश्यददात्यन्नंचवारिच नोपतिष्ठति
तत्तस्यश्रांतरिक्षेविनश्यति ३३ पिंडप्रदानादिभिर्यद्यपिश्रद्धासमन्वितम् यत्किंचिद्दीयतेतच्चपापिनांनोपतिष्ठति ३४
इतिश्रीस्कंदपुराणेरुद्रस्कंदसंवादेआषाढमाहात्म्येएकविंशोऽध्यायः २१ ५ ईश्वरउवाच कदाचिदथ
साद्दक्षासार्थैरविरुतांप्रति गच्छंतमतिवेगेनशुचिस्नानायभक्तितः १ तेनसार्थेनसासाद्धंसंश्रुत्यस्नानजंफलम्
जगामसत्वरात्तृष्णानापीप्रतिमहानदीम् २ तत्रसाघ्रतिनीस्नात्वाचाषाढेनपतीजले मासंयावद्भिराहारावैकाग्र्यस्थितमा
नसा ३ स्नानंसमाप्यसाविप्रान्भोजयित्वातपस्विनी अन्येद्युरपिविप्रान्सानिमंत्र्यत्वतथार्पयत् ४ श्राद्धंकृत्वाकृ-
ताषाढफलंपत्युर्ददावथ पश्चात्तान्भोजयामासमिष्टान्नैःश्रद्धयान्विता ५ वसुरुद्रादित्यसंकाःपितरःश्राद्धदेवताः ता
गत्वाकथयामासुस्तत्पुण्यमंतकायच ६ तथाषाढेचयस्नात्वास्वभर्त्रेश्रद्धयाददौ यमस्तच्चित्रगुप्तायविचार्यचमहाफल
७ स्वकंपुरुषमाकार्यप्रोवाचविनयान्वितः आदिदेशाथवेगेनयात्वाकृष्यचरौरवात् ८ नीयतांसविमानेनपशुक्री
तस्त्रिविष्टपम् निष्कल्मषोयःसंपन्नःशुचिःस्नातश्चपुण्यभाक् ९ स्नात्वातपत्यामेतस्यपत्न्यादत्तंफलंमहत् तस्मा
ज्ज्ञातश्चसस्वर्गेभुक्त्वाभोगान्मनोरथान् १० कल्पेनापिनचैकेनतस्यपुण्यस्यसंक्षयः अन्यानिसर्वपुण्यानिक्षीयं
तेकिलभोगतः ११ अत्रयत्क्रियतेपुण्यमाषाढेतपतीजले तस्यपुण्यस्यनांतोस्तिभोगात्कल्पशतैरपि १२ ततोसे
धर्मराजस्यवाक्येनत्वरयान्वितः यात्वाचतत्समुद्धृत्यरौरवाद्भृशदारुणात् १३ विमानवरमारोप्यजातंदिव्यश
रीरकम् दिव्यांगरागवस्त्रंचदिव्यचंदनचर्चितम् १४ दिव्यवस्त्रपरीधानंदिव्यमाल्योपशोभितम् शासनाद्धर्मराज-
स्यनिनायत्रिदिवंप्रति १५ हर्षितश्चपशुक्रीतोविस्मयोत्फुल्ललोचनः एतत्सत्यमसत्यंवास्वप्नःकिंवाऽगतोदृशः १६
१६ किमेतन्ममपापस्यस्वर्गप्राप्तिःकथंभवेत् नास्तिमेसुकृतंकिंचित्सदैवपापकारिणः १७ सर्वथानैवपश्या-

मिस्वस्वर्गप्राप्तिकारणम् कोवासौपुरुषोयेनरौरवादहमुद्धृतः १८ क्षणंसुखंमेसंजातमेतत्किंमेप्रभावजम् एवं वितर्क्यबहुधापुरुषंतमभाषत १९ कस्त्वंकस्मादागतोऽसिकेनवाप्रेषितः शुभः केनाहमोचितस्तस्माद्रौरवाद्दारुणाद्भृशम् २० मयापुण्यस्यलेशोऽपिनकृतःपापबुद्धिना यत्नेनपानकमहोमयाप्रतिदिनंकृतम् २१ कस्मान्मेस्वर्गसंप्राप्तिरेषामेसशयोमहान् किंवदाम्यथचत्वंकोमहापापीत्यबांधवः २२ येनाहंदारुणादस्माद्रौरवाच्चसमुद्धृतः यन्नकुर्यात्पिताभ्रातानपुत्रोनचबांधवः २३ कृपालुरपिनत्वन्यस्त्वयाहेलनयाकृतम् दत्वास्याम नृणोयत्नेनन्नास्तिभुवनत्रये २४ इत्युक्तेतत्र सतदादेवदूतउवाचतम् किंकरिष्यसिप्रश्नेनस्वर्गमेहिमयासह २५ भुक्त्वात्रविपुलान्भोगान्मानवैरतिदुर्लभान् श्रुत्यनपुण्यजनितान्कालावधिविवर्जितान् २६ अथवाश्रवणेच्छातेतच्छृणुष्ववदामिते यमस्यपुरुषमात्वंतद्गृहाच्चसमागतम् २७ तेनचप्रेषितविष्णुतद्वाक्येनविमोचितः स्वर्गंचनीयसेतद्वदितंतेकथितंमया २८ इतिश्रीस्कंदपुराणेआषाढमासमाहात्म्येद्वाविंशोऽध्यायः २२

ईश्वरउवाच इतिदूतवचःश्रुत्वापशुक्रीतःपुनस्तदा उवाचपुनरप्यात्मन्ममैमंहितकारकम् १ ममित्रंस्वरक्रीतःपत्यमानोस्तिरौरवे मयातेनचसंभूयःपानकंबहुशःकृतम् २ कुमृत्युरपितुल्योऽभून्नतुदाहादिकाःक्रियाः तस्याप्यासीद्रौरवश्चह्ययोरप्यभवत्समः ३ त्यक्तःकथंसतत्रैवकस्माच्चाहविमोचितः एतन्मेकारणंदेवदूतवदयथातथा ४ दूतउवाच स्वर्गस्यकारणंश्रोतुमिच्छातेतच्छृणुष्वमे याचतेस्तिशुभाभार्या श्रोत्रियाणांकुलोद्भवा ५ आषाढेस्नपनंतस्यास्तपत्याःपापनाशनम् तस्यपुण्यंतयादत्ततुभ्यंब्राह्मणसन्निधौ ६ तत्पुण्यमहदज्ञात्वायीधर्मराजेनतत्क्षणात् मोचितोनरकाद्घोरात्कल्पभोगात्सुदुःखभाक् ७ आषाढपुण्यदानेनमोचितस्त्वंस्वभार्यया स्वरक्रीतामोचिकस्तु इहकोपिनविद्यते ८ तस्माद्धर्षसहस्राणिपतितो

सौहिरौरवे पीड्यमानोनिजंकर्मभुक्त्वायहूहितंपुरा ९ आषाढस्यनपस्यैत्वंफलंस्कंदपुराणंदिवि नित्यंरमस्वभुंजानो यावत्कल्पव्यवस्थितिः १० इतितद्वचसाप्रीतःपशुक्रीतोभ्यधात्पुनः यमस्यानुचरोभूत्वादयालुत्वंविलोक्यसे ११ तत्तेकिंचिदहंयाचेनान्यथाकुरुषेयदि यदाषाढस्यमेपुण्यमस्तिदत्तंतुभार्यया १२ अहंयस्याःप्रभावेननिर्गतोरौरवाक्षणात् तदर्धपुण्यंदत्वायंरवरक्रीतोऽपिमोच्यते १३ नरकेदारुणेत्यक्त्वाकथमेतद्व्रजाम्यहम् भ्रातुरप्यधिकयस्माद्बूहिनत्सहचारिणम् १४ यद्यनेनसमंस्वर्गंयाम्यहंत्वत्प्रसादतः यत्तद्याचेऽनलिंबध्यानान्यथाकर्तुमर्हसि १५ उक्तमेष्यफलायंचाकृस्यापीहनजायते इतिश्रुत्वादेवदूतःपुनस्तमित्यभाषत १६ ननेष्यसियदिस्वर्गंस्वमित्रंप्रतिदीयताम् सवनार्घफलंतस्मैनिरयाद्येननिःसरेत् १७ ततोऽसौदृष्टमनसाददौपुण्यार्द्धमादृतः दत्तंपुण्यंदेवदूतःस्थापयित्वातुतंपथि १८ व्यावृत्यतुगृहीत्वातुतत्समीपमुपाययौ खरक्रीतेनसंयुज्यपशुक्रीतस्तुहर्षितः १९ तस्यपत्न्यायथादत्तंपुण्यमाषाढसंभवम् तद्विभज्ययथादत्तंतेननस्मैस्वपुण्यतः २० खरक्रीतस्तथादृष्ट्वःपशुक्रीतस्यतांस्त्रियम् तुष्टावपरमप्रीत्याहर्षयुक्तेनचेतसा २१ अहोधन्याःस्त्रियस्ताश्चतारयंतिनिजपतिम् :कष्टेभ्यःसमस्तेभ्योविहीनेभ्योविमोहितः २२ यदापितासत्यजतियदामाताचबांधवः तदापिनैवत्यजति ध्वीस्त्रीस्वपतिंपुनः २३ विवर्ततेस्मशानाच्चमाताभ्रातापितास्वसा मित्राणिबांधवाश्चैवसाध्वीस्त्रीनानिवर्तते २४ प्रियंकुर्वंतिसततंस्वभर्तुःकुलजाःस्त्रियः कायेनमनसावाचाप्राणैरपिविशेषतः २५ मृताभर्तास्वयंशीनमृतावाकथंचन सैवोद्धरतिभर्तारंतत्किमस्तितताऽधिकम् २६ यादृष्ट्वाःप्यथवाभर्तुरिहसास्याद्यचजायते मंत्रीचमंत्रंदिशतिदाशीवाराधयत्यपि २७ तस्यावदामिकियतोगुणान्सवगुणाधिकान् स्मरवहतुस्त्रिवर्गस्ययत्प्रकृष्टंहिकारणम् २८ तेधन्यामानवालोकेयेषांभार्यापतिव्रता अपिपातककर्माणःकिंपुनःश्रेयसीस्थि

ताः २९ साध्वीभार्यासमंनास्तिहितंलोकेषुकिंचन यस्याःप्रभावात्प्राप्यंनेसौख्यानीहपरत्रच ३० सत्यंतपस्यु
धृतोसिभार्यायासहितोमया अपिलक्षैश्चवर्षाणांनान्यथोद्वहणंभवेत् ३१ इहसर्वेषुकार्येषुस्त्रीभ्योन्यत्सा न
हि कार्येऽकार्येत्यनीशःसन्नंशार्धेनस्त्रियाहरेत् ३२ इतिश्रीस्कंदपुराणेरुद्रस्कंदसंवादेआषाढ॰ मा॰
त्म्येत्रयोविंशोऽध्यायः २३ ॐ ईश्वरउवाच इतिस्तुत्वाततोमित्रंपरिरभ्यप्रीतमुवाचह पानक्यपित्वह-
धन्योयस्यास्तित्वद्विधःसखा १ येनोद्धृतोहंनरकान्निर्तांतदारुणादपि नकरोतिचयद्भ्रातानपुत्रोनचबांधवः
२ यद्दच्छाविष्टमनसायत्त्वयाहेलयाकृतम् अन्येपुमांसःसुलभाःसदाराश्चातिदुर्लभाः ३ यदुद्धारमात्वाहि
नरकादतिदुःखदात् कल्पांतंपतितोयावद्वस्थात्यनपत्यकः ४ ससूनुःपापकमापिपाल्यमानोनशोचति कल्प-
वाप्यद्यवापुत्रोमोचयिष्यतिमांध्रुवम् ५ नकश्चित्पिंडदोयस्यमहापातककर्मणः निर्गमेतिनिराशस्यतद्दुःखंवेत्ति
नापरः ६ भ्रात्रावासूनुनावापिकिंकार्यत्वनुपकारिणा परोपिहितकर्तायःसबंधुरितिनिश्चयः ७ अहंतुरौरवेम-
ग्नोनिराशश्चनिजोद्धृतौ उद्धर्त्तात्वंतथोदारःनिजपुण्यार्धदायकः ८ दातुंनैवास्यपुण्यार्द्धमुत्सहेतनरोऽपरः त्वद्वृते
पुरुषव्याघ्रपरदुःखेनदुःखितः ९ इत्युक्त्वानिजमित्रंदेवदूतस्यसन्निधौ देवप्रतिततोयातस्ताभ्यांसहमुदान्वि
तः १० देवदूतपुरस्कृत्यस्वर्गमार्गस्यदेशकम् गच्छतौतौपरंहृष्टावित्यूचतुःपरस्परम् ११ दृष्ट्वारौरवमासाद्य
तस्मात्कष्टाद्विनिर्गतौ दृष्ट्वाप्रात्यंशुचिस्नानात्पुण्यंदत्ततयामहत् १२ जन्ममानुष्यकंलब्ध्वायेनवांछितमाप्यते
व्यर्थीकृतंतदावाभ्यांनास्तिकत्वेनवर्धनात् १३ आः कोपिवेदमार्गेतंकल्पवृक्षंपरित्यजेत् तत्वन्यधर्माचरणादक
र्मंपरिसेवया १४ अहोमोहोमनुष्याणांश्रुतिधर्मपरायणम् परित्यज्यचनास्तिक्यंमृगतृष्णाजलार्थिना १५
आवाभ्यांयानिपापानिकृतानिस्कमहांत्यपि कल्पांतेनापितैःप्राप्तोनरकोनैवतीर्यते १६ आः कोऽयंचमनुष्याणा

मविचारोमहानसौ यत्क्षणार्धस्करवस्यार्थेसत्यतेनरकश्चिरम् १७ धिङ्नास्तिकान्दुराचारान्दुर्वृत्तान्मोहितान्जनान् संत्यज्यस्वस्वमाचरेयैःपापंक्रियतेनरैः १८ भूयस्तैर्मानवैःपापैर्यैर्ह्यातद्वाप्रकल्प्यते किंपतेवानद्यश्चेच्छंपापकष्टतरंहियत् १९ अनिगुप्तनृभिःपापंपापिभिर्यद्विधीयते तदेवतद्यमोवेत्तिद्रष्टाय पुण्यपापयोः २० येच पुण्यमकुर्वंतोवेदबाह्यक्रियापराः यमेनपरिपीड्यंतेदारुणंनिरयंगताः २१ वैदिकेयःसदाचारःसनूनंसर्वकामदः पूर्वैःपूर्वतरैर्जुष्टःसकथंत्यज्यतेबुधैः २२ येपुण्यकर्मकुर्वंतिवेदोक्तंनियमादृताः लोकह्येतेपूज्यंतेलभंतेवांछितंस्करवम् २३ वेदोक्तकर्मकर्तव्यंपूज्योविष्णुःसनातनः त्यक्त्वाविषयासक्तिर्जेयेकामादिकान्रिपून् २४ एषएवपरोधर्मएतदाश्रयिणांनृणाम् इहलोकेपरस्मिन्वाबन्धोपिनहिबन्धते २५ देहसंबंधिनःसर्वेभ्रातृपुत्रादयस्त्विह तस्मिन्गतेथकस्यैतेसंतुसंबंधभाजिनः २६ पुत्रोदयप्रियाःसर्वेस्वात्मकामायकेवलम् आत्मकामोनयत्रास्तिप्रेमस्तत्रनविद्यते २७ कस्यार्थेक्रियतेपापंयेनात्मावाध्यतेदृढम् नरकेपच्यतेयावद्यावदाभूतसप्लवम् २८ भारतं वर्षमासाद्यहित्वास्करुतकर्मयः कुरुतेपातकंकर्मनिजक्लेशायकेवलम् २९ नरेणागत्यभूमिंचयत्रैवोपार्ज्यतेद्रव्यम् पापंपुण्यंचनान्यत्रतत्रकिंपापमर्ज्यते ३० रोहणंसमुपागम्यरत्नराशिंसमूल्यकम् त्यक्त्वापाषाणशकलानाद्दत्तेसविमूढधीः ३१ अहोमोहोमनुष्याणांकोपिसंसारवर्तिनाम् येनामृतंपरित्यज्यभुज्यतेविषमादरात् ३२ अन्येकिमर्थंगत्वेतेकुर्वाणाःकर्मपातकम् आवाभ्यांतत्करुतंकर्मयेनायंनिरयंगतौ ३३ नृणामृतौमहादुःखंमहादुःखंचजन्मनि बाल्यतारुण्यवृद्धत्वेष्वपिदुःखंतथैवतत् ३४ तत्ररागाच्चकुरुतेपातकंयदिमानवः कल्पंयावत्ततोदुःखंतत्करुतोजन्मिनांस्करवम् ३५ तस्मादेतंपरित्यज्यमुक्तिंवांछंतिसूरयः ३६ मुदितावितरेतरंवचोनिगदंतौसहतेनजग्मतुः स्करसद्मपतंगजाजलस्नपनापादितभोगभुक्तये ३७ पत्योस्वर्गेयातमात्रेचतस्यभार्यास्वमेकेचि

दित्येवमाहुः भद्रेभर्तारौरवेपच्यमानोलब्धापुण्यंस्नानजंनिर्गतश्च ३८ ताप्याषाढस्नानपुण्येनतुल्यंनास्तीहान्यद्येन
कल्पांतभाग्यांम् हित्वासद्योदारुणौरौरवांतंप्राप्तःस्वर्गेत्वत्पतिर्मित्रयुक्तम् ३९ पापवान्निजपतिर्यद्यात्वयासाधि-
साधुनरकात्समुद्धृतः ईदृशीभवतिकापेगेहिनोचेद्भवत्यबहुलाक्वचित्कचिन् ४० सप्तमेवभवबुद्ध्यतंततोदृष्टस्
र्यतनयाप्रभावयाँ स्नायतेस्मसनतंतथाशक्त्यावत्सरान्दशचसप्तमादरात् ४१ इत्यथभुनवतीविनिद्रितापश्यति
स्मपुरतोनकिंचन स्वप्रकारणमपृच्छदाकुलाब्राह्मणानतिविशारदान्मुने ४२ मासलंघनविधेश्चदानतःस्नानतो
ऽपिकृतपुण्यसंचया जीवितंसमगमत्तपस्विनीभर्तृलोकमथसत्वरंययौ ४३ त्र्यासाद्यस्वपतिमुदनयद्भूरिपुण्य
प्रभावास्वर्गालोकादपगतभयंवैष्णवंधाम्नयत्र तत्राकल्पस्वपतिसहितास्वार्जितानांक्षयात्सा भोगासक्तंभुवन
पतिनाप्रीतिदत्तानभुक्तम् ४४ इतिदुरितविनाशिस्नानमाहात्म्यमुक्तंदिनमणितनयायामासिचाषाढसंज्ञे श्र
वहितकृतबुद्धिर्मानवोयःशृणोतिप्रतिदिनमयत्नोपिस्नानषष्ठाशभाक्स्यात् ४५ इतिश्रीस्कंदपुराणेत्र्याषा
ढमासमाहात्म्येईश्वरस्कंदसंवादेचतुर्विंशोऽध्यायः २४ ७ ईश्वरउवाच अथासीद्ब्राह्मणःको
पिताम्बालांगलवर्द्धनः धनवांश्चाद्वदेशीयःकृष्याजीवीनिरंतरम् १ सरद्धत्वेतृतयनःपुत्रैर्निष्कासितागृहात्
भैक्ष्यवृत्तिस्ततोजातोब्राह्मणोदुःखपीडितः २ संगत्वानपतीनीरंतत्रकृत्वामठीशुभाम् उवासतत्रभैक्ष्यसंग्रा-
म्नेनकरोतिसः ३ कणानादायभैक्ष्यस्यस्नानंकृत्वापचत्यसौ देवतापितृभूतेभ्योदत्वाभुंक्तेचनित्यशः ४ एवस्थि
तेनत्वाषाढेतेनस्नातास्तुविंशतिः एकदातस्यविप्रस्यस्नानार्थीकोपिचाडवः ५ तस्यमठ्यामुत्तरितः तीर्थेषुस्नान
माचरत् तत्तिलाननुज्ञाप्यगृहीत्वांगलवर्धनः ६ तर्पणार्थंनलोभेनताम्बप्रस्थतिमात्रकान् तीर्थेतिलापहर
णात्पातकंयदजायत ७ तत्पातकवज्रलेपोनकेनापिविनश्यति ततःसनिर्ययौविप्रः कुर्वेस्नाप्याःप्रदक्षिणां

८ ततः कालेनमहतामृतोलांगलवर्धनः तापीनदेगृहीत्वानुयमदूतैर्यमांतिकम् ९ नियतेस्मततोधर्मराजःपप्र
च्छलेखकान् कियच्चपुण्यमस्यास्तिकियदस्यास्तिपातकम् १० विलोक्यकथ्यतांसर्वमेतन्मेनुत्वरान्वितैः धर्मराज-
वचःश्रुत्वाप्रत्यभाषतलेखकाः ११ अनेनप्रथमंपापंयत्कृतंकृषिकर्मणा तत्सर्वंविलयंयातितापीस्नानप्रभावतः
१२ यच्चतापीतटेतेनपातकंतिलचौर्यतः क्रियतेस्मतदेवास्तिनान्यत्किंचिन्नविद्यते १३ तच्चास्याप्यल्पमेवास्तियन्न
लोभाद्व्यधीयत ततोविमृश्यतैःसार्द्धंधर्मराजोऽथबुद्धिमान् १४ त्यक्त्वापस्यविशन्ह्यर्थंनरकंवेक्षणात्ततः तस्य
चाज्ञापयामासदेवदूतंदिदेशच १५ इतिश्रीस्कंदपुराणेईश्वरस्कंदसंवादेआषाढमासमाहात्म्येपंचविंशो
ऽध्यायः २५ ६ ईश्वरउवाच ततोसौदेवदूतेनमाहात्मान्तरंक्षणे. ततश्चभ्रामितः सर्वान्न-
रकानतिदारुणान् १ हन्यंतेयत्रतेजीवाःपातकैर्बहुभिःसदा निंदतःस्वकृतंकर्मक्रंदतश्चपुनःपुनः २ स-
तान्तथाविधान्दृष्ट्वामार्यमाणान्मुहुर्मुहुः यमदूतमथोवाचकृपयापरयान्वितः ३ कानिकानिचपापानिकृ
तान्येतैर्महीतले यएवविविधैर्घातैर्हन्यंतेचपुनःपुनः ४ एतेषांतानिपापानिब्रूहिमेयमसेवक एतस्यचवचः
श्रुत्वाबभाषेयमकिंकरः ५ यैश्चपित्रोकृतोभेदःकृतोवापितृपुत्रयोः दंपत्योर्मित्रयोर्वापितथान्येषांभुविस्थि
तः ६ दूतैर्यमस्यपीड्यंतेकाष्ठाभ्यांपार्श्वयोर्द्वयोः ककचैःपीड्यमानास्तेदृश्यंतेऽत्रस्फुटारुणम् ७ आकृष्टा
यैःपितामातागुरवोब्राह्मणास्तथा असंख्याताःकृतादोषाःसाधूनांसंयतात्मनाम् ८ विदार्यजठरंतेहिहन्यं-
तेलोहशंकुभिः कराभ्यांयैःपरद्रव्यंहृतंस्पृष्टाःपरस्त्रियः ९ छिन्नाजाताःपुनश्छिन्नाःक्रियंतेतत्कराक्षरैः का
मातुरैर्मर्त्यलोकेयैराःस्पृष्टाःपरस्त्रियः १० आलिंगयंतितान्दूतालोहभूमिशिखिद्रुताः निष्ठीवनकृतयेस्फुटंदेवतायतने
जले ११ उल्मुकानिमुखेतेषांक्षिपत्येतेपुनःपुनः यैश्चापिपितरौवृद्धौब्राह्मणाधेनवस्तथा १२ पादप्रहाराभिहता-

च्छिद्यंतेलंनदंघ्रयः ब्राह्मणानांगुरूणांचगवांक्रोधवशानुगैः १३ प्रत्तास्तेमुद्गरैश्चहन्यंतेमस्तकेसकृत् अभोज्या नांग्रहेभुक्तंब्राह्मणैर्यस्कलोभनः १४ तेषांमुखेनुक्षिप्यंतेज्वालातेलोहगोलकाः कृतपापमयतस्यवैरभक्षस्यभक्षणम् १५ वमतोंत्राणि हन्यंतेतप्तेभृशपीडिताः पुनःपुनश्चहन्यंतेशपंतेचपुनःपुनः १६ ब्राह्मणानांनिहंतारोवदतांकुप णागिरः स्रुवर्पास्तप्तयिनामेषांकिंकरैरपिघातकैः १७ उत्तमागानिचूर्ण्यंतेजायंतेभृत्यएवच ब्राह्मणैर्यैःसरापीताकाम नोत्यविशंकितैः १८ ज्वलत्ताम्ररसंतेत्रपाय्यंतेयमकिंकरैः प्रसभंपातयित्वाथलोहैःसंदशकैर्मुखम् उत्पाट्यनिगडैर्ब- ध्वाहस्तयोःपादयोर्भृशम् गुरुस्त्रीणांतुभोक्तातल्लिंगाच्छित्वासमुष्ककं २० लिंगस्रोतसिहन्यंतेप्रज्वलल्लोहशंकवः महापातकिभिःसार्द्धंनराःसंसर्गकारिणः २१ क्षिपंतिक्षारकुंडेषुकृत्वासर्गविवक्षितान् गवांचवधकर्तारःसंप्रेक्ष्यंते शिलातले २२ स्फुटितास्थिवसामांसाक्रंदंतश्चदिवानिशं स्त्रीघातकानामध्यानिपाटयित्वाथकिंकरैः २३ पाषाणै श्चप्रपूर्यंतेज्वलद्भिरतिदुःसहैः तप्तेकटाहेपच्यंतेबालघ्नाकृतस्तुयैः २४ नद्यथयाम्रियंतेचजीव्यंतेचपुनस्तथा शू लप्रोताश्चतिष्ठंतिभ्रूणप्रायेनराधमाः २५ लोहतुंडैस्तुध्यमानावायसैरतिदारुणैः मार्यंतेथचजीव्यंतेजीवानांघातकामु काः २६ लोहदंतैःश्वभिश्चाग्रेभुक्तमांसास्थिमेदसः जघ्नुःकेवलमात्मार्थंयेपशून्भिर्दयानराः २७ जीवतामेवमांसानितेषांखादंतिराक्षसाः येविप्रनाशंगृण्हंतिपरद्रव्यनराधमाः २८ आकार्यंताभोजनार्थंमुखेवह्निंक्षिपंतिच जिह्वातालुगले दग्धावेदनाभृशमूर्च्छिताः २९ पतिताश्चाथदृश्यंतेवेष्ट्यमानाश्चनेकशः छलेनपरवित्तानियेत्तेतानिचलोभतः ३० तप्तेत कृतत्तन्मांसाश्चेष्टंतेपतिताभुवि फलितानापुष्पितानांछेत्तारोयेचशारिवनाम् ३१ क्रियंतेखंडशस्तत्रनिष्कृपैर्यमकिंकरैः यैःपरेषांगृहेवन्हिःप्रक्षिप्तःक्रोधलोभतः ३२ नरवप्रभृतिदृत्यंतेमंदमंदंविरागिणः गरदानांमुखेलोहशंकवोवन्हिवत्कृताः ३३ मार्यंतेपशुवत्तेषांनिर्घृणैर्यमकिंकरैः एतेचान्यापहर्तारोबद्धास्तिष्ठंतिनित्यशः ३४ नीत्रयाक्षुधयाविद्धाधिलपंतिपुनस्तरा

तैलेक्षुरसहर्तॄणांयंत्रेनिष्पीड्यकिंकरैः ३५ पात्यंतेनिगलेमांसंकंदंतिनितरांमुहुः धान्नूनामपिहर्तॄणांयंत्रमारोप्यपीडिना
न् ३६ आकर्षंतेनितरांधान्नून्दारुणायमकिंकराः स्त्रियोपिदृश्यपापेननरकेषुदुरत्ययम् ३७ सहंतेयाननायास्मींताद्दशा
मपिदारुणाम् अपिस्वल्पेकृतंपापंभुज्यमानंस्कदारुणम् ३८ इहपश्यंनरान्द्वारान्पात्यमानान्मुहुर्मुहुः सुकरपातकंक
र्मक्लीबानामपिकुर्वताम् ३९ शक्तेरपिसदुर्भाग्यभुंजानैर्निरयास्थितैः तस्मान्नपातकंकर्मकर्तव्यंसुहितेप्सुभिः ४०
मृत्युर्दूरंननरकंनृत्स्मादतिसमीपतः इतितेकथितंसर्वंमनीषाप्राप्तिकारणम् ४१ इतिश्रीस्कंदपुराणेभ्राषाढ-
माहात्म्येईश्वरस्कंदसंवादेषड्विंशोऽध्यायः २६ ॐ ईश्वरउवाच नरकादर्शिताःसर्वेधर्मराजस्यशासनात्
व्रजामोधर्मराजस्यसकाशंतस्यचाज्ञया १ इत्युक्तःसननोयातोधर्मराजनिवेशनम् देवदूतेनसार्द्धंसन्प्रागच्छन्महींगतः
तः २ धर्मराजेननेजस्वीदीप्यमानोयथारविः अभ्युत्थायह्यजंतंतुबहुमानसुरःसरम् ३ तत्रोपवेशयामासधर्मराजो
निजासने तपत्याषाढजनितंतस्यपुण्यमनंतकम् ४ ज्ञात्वाविमानमानीयप्राहलांगलवर्धनम् त्वयार्जितोविष्णुलोकः
कालसंख्यानविद्यते ५ तन्नलोकस्तिनेवासःपार्श्वेभगवतोक्षयः कृतंचपातकंस्वल्पमिहानीतोऽसिनत्कृते ६ दर्शि
तानरकास्तस्मात्तेननहिलयंगतम् प्रथमंभुज्यतेत्यत्रयदल्पंपुण्यपापयोः ७ तत्त्वयास्वल्पकंपापंभुक्तंदुर्गतिदर्शनात्
अतःशुद्धशरीरस्त्वंविमानंवरमारुह ८ याहिवैकुंठभुवनंभोगान्भुंक्ष्वयथेप्सितान् अर्जितंयत्त्वयामर्त्येविंशत्याषाढसं
भवम् ९ तदनंतफलंपुण्यंक्षीयतेनकदाचन धर्मराजवचःश्रुत्वाबभाषेब्राह्मणस्तदा १० यद्यनंतमभास्यत्पुण्यंभास्क
रनंदन तेनपुण्येनसर्वेनिर्गच्छंतुस्कदुर्गतेः॥ एतद्याचेधर्मराजकृपांकुरुममोपरि ममसर्वेनपुण्येनविंशत्याषाढजेनतु
१२ येदृष्टादुर्गतिंप्राप्तामयातानाशमोचय तंप्रत्युवाचराविजःकिंतेषांवैकरिष्यसि १३ निजंतभुंक्ष्वसुकृतंनोचिरंसंतुना
रकाः स्वकृतंभुज्यतेकर्मपापंवार्यदिवाशुभम् १४ इहत्मेकेपरस्मिन्वानान्योभोक्तास्तिकश्चन इतिमत्वाव्रजक्षिप्रंविल

बोनात्रमन्यते १५ ततोसावंजलिंबध्वा धर्मराजमथाब्रवीत् कथंगच्छामिदेवेशमुक्तानानतिपीडितान् १६ यदिपुण्यंममास्तेनदीयतांत्व्यविचारतः एतानापदूतांस्त्यक्त्वाकिंपुण्येनप्रयोजनम् १७ क्षणंवाथक्षणार्द्धंवाममपुण्यानुसारतः पुनंतुस्फुरिनः सर्वेजंतवोनारकाश्रमी १८ एवंप्रसादकुरुमेकृपाकुरुममोपरि एतावतामयामासंसर्वेहिवाछितफलम् १९ विष्णुलोकेपिमेहर्षईदृशोनभविष्यति यद्गेतान्समालोक्यनरकेभ्योविनिर्गतान् २० तस्मादिमंप्रसादमेकर्तुमर्हसिसूर्यज नरकेभ्योविमुच्यैतान्दारुणेभ्यःप्रपीडितान् २१ नेष्यामिगतपुण्योहंनरकेभ्योयथाक्रमम् तेनपुण्यप्रभावेनसात्विकत्वमुपेयुष २२ इतिश्रीस्कंदपुराणेआषाढमाहात्म्येसप्तविंशोऽध्यायः २७ ॐ ईश्वरउवाच इतिश्रुत्वाथतेनोक्तंधर्मराजोब्रवदिदम् अहोमहासाहसंकिंकरोषित्वंविचारय १ नरकार्तिक्षणमपिपरार्थेत्रसहेतुकः अमृतहस्तसंप्राप्तंदत्वातेभ्यः प्रमादतः २ प्रयत्नतःसमानीयाविषंकोत्रजिघ्रक्षता अविचार्यनकर्तव्यंकार्यंकिमपिपंडितैः ३ नरोविमृश्यकारीहि यावज्जीवंनशोचति तद्दुच्छस्वसुरवंचामैः किंकार्यंपापिभिस्तव ४ श्रुत्वोवाचपुनर्विप्रोधर्मराजमुखादिति सत्यमुक्तंत्वयादेवधर्मराजहितंमम ५ परोपकारिणोभूयुरहितंनभवादृशाः किंतुलोकाभिरुचितंभिन्नमेवाभिदृश्यते ६ सुखंवायदिवादुःखंतत्रहेतुर्नदेवताः यदत्रयोचतेयस्यतत्स्यतत्सतंहितम् ७ विष्णुलोकंपरित्यज्यनरकेगमनंपरम् एषामर्थेममाभीष्टंतत्किंस्वामिन्नपूर्यतेत्र्यभीष्टदानंप्रवरंदेवानामपिदृश्यते तस्मादेतन्ममाभीष्टंप्रसीदक्रियतांप्रभो ९ इतितद्वचनंश्रुत्वाप्राहवैवस्वतोयमः यद्येवमेवतेभीष्टंविलंबःक्रियतेकथं १० एभ्योदेहिनिजंपुण्यंविंशत्याषाढसंभवम् इतिप्रेतपतिर्वाक्यंश्रुत्वात्दृष्टतनूरुहः ११ ददौपुण्यंतदातेभ्योविंशत्याषाढसंभवम् ततस्तेनरकेभ्यस्तेसर्वेचापिविनिर्गताः १२ तस्यपुण्यप्रभावेनतत्समीपमुपागताः नरकाद्धारकज्ञात्वातुष्टुवुस्तंमुदान्विताः १३ कृपानिधेवर्ण्यतेकिंनावकोगुणसागरः कनिदृष्टाश्रुतावानदयावतोनराइह १४ त्वादृशोनश्रुतोदृष्टोदयावान्भुवनत्रये अंगीकृत्यपरार्थंयस्तद्दुष्कृतभवांव्यथाम् १५ पापान्नरानुद्धरंतिसत्यमेवनचापरः का

रुण्यादुपकुर्वंतिसर्वेऽपिपुरुषाइह १६ विनैवकारणंकृत्वात्युपकारपरागताः इहदुःखविनिर्मुक्तिस्त्वदन्योविदधातिकः १७ कल्पांतनरकावासानारिताभवतावयम् अस्माकंतंपितानूनमिहसद्गतिदायकः १८ पितॄणांवचनेस्नेहंनधत्तेय स्त्वयाधृतः सुखीभवनरश्रेष्ठकुरुपुण्यमहर्निशम् १९ दुर्गतानुद्धरसदाधर्मेतत्परुसदामतिः अत्यंतपुण्यवान्भूयआपन्नार्तिहरःसदा २० सतांहिविभवोलोकेसर्वसाधारणोमतः इतिनस्याशिषंदत्वागतास्तेपरमांगतिम् २१ नाप्यास्नानस्यपुण्येनविमुक्ताःसर्वपातकैः २२ इतिश्रीस्कंदपुराणेआषाढमाहात्म्येऽष्टाविंशोऽध्यायः २८ ॐ ईश्वरउवाच ततोस्यब्राह्मणस्याहयमलांगलवर्धनः प्रणम्यपरयावाचाहर्षबाष्पसमन्वितः १ भगवंस्त्वत्प्रसादेनप्राप्तंसमभिवांछितं देवतासंगमाल्लिंकिंनाप्यतेचापिदुर्लभम् जगद्दंडधरःकस्त्वंकाहंकृषिकरोद्विजः २ मयिकोयंप्रसादस्तेयेनत्वांदृष्टवानहं मनोरथादपिपराकापीयंतावकीकृपा ३ यद्यतममवाक्येननरकेभ्योविमोचिताः प्रासादेनानुज्ञातेननरकंहित्यजाम्यहम् ४ मयाहिदत्तंस्वपुण्यंगतपुण्योस्मिसांप्रतम् अथावाप्तदरंकस्यामातुर्यामिप्रसाद्यताम् ५ इतितस्यवचःश्रुत्वाधर्मराजोब्रवीत्पुनः गतपुण्योस्यहोकस्मात्त्वयापुण्यंकृतंबहु ६ प्रेतानिमान्मोचयित्वास्वपुण्यस्यव्ययेनतु स्वयंस्वकृत्यानरकाद्यएतेमोचितास्त्वया ७ त्वदन्यःकोऽपिशक्नोतिकर्मैतत्कर्तुमीदृशम् आत्मनःसुखमिच्छंतिसर्वेऽपिपरपीडया ८ अंगीकृत्यात्मनोदुःखंत्वयात्वन्यस्यवंकृतम् तेननेपरमांभक्तिंगतपुण्यतदक्षयम् ९ व्रजविष्णोःपदंनित्यंदेवैरपिसुदुर्लभम् यत्पदंयोगिभिर्गम्यंविष्णुध्यानपरायणैः १० यत्रगत्वानशोचंतिननिवृत्तिंःकदाचन तत्पदंप्राप्यपरमंमोदस्वविष्णुसन्निधौ ११ अक्षयोविष्णुलोकस्तेजातोब्राह्मणसत्तम तपत्याषाढमासस्यस्नानपुण्यप्रभावतः १२ येनपुण्येनतेसर्वेमोचिताःपापकर्मणः स्वयंविष्णुपदंप्राप्तोयंलब्धाननिवर्तते १३ अहोतीवप्रभावोयमाषाढस्नानसंभवः इत्युक्तोधर्मराजेनविप्रःपरमहर्षभाक् १४ तमापृच्छ्यनमस्कृत्यततोगंतुंप्रचक्रमे यावद्विप्रोविमानंतावदाव्रजन् १५ विष्णुनाप्रेषि

तत्रत्रसमानीतंहेर्गणैः नेतंविमानमारोप्यशंखचक्रगदाधरम् १६ पीतांबरधरंकृत्वावनमालाविभूषितम् प्रतस्थिरेविष्णुलो
कंमानवैरतिदुर्लभम् १७ तत्पुरोदेवगंधर्वादेवागानपरजगुः अप्सरसोप्यनृत्यंतगणास्तुर्याण्यवादयन् १८ शंखभेरीस्व-
नास्तत्रतथापटहनिस्वनाः ततस्तेविष्णुभवनंनिन्युस्तेवैष्णवागणाः १९ यत्रदेवोऽस्तिभगवान्पुराणपुरुषोव्ययः तद्दृक्षा
देवदेवस्यआनंदपरमंययौ २० प्रणम्यपरयाभक्त्यास्तोत्रमेतज्जगादच लांगलवर्धनउवाच त्वमात्मासर्वभूतानामे-
कएवपृथङ्ननच २१ आकाशस्येवतेदृष्टंमनेकत्वमुपाधिना इंद्रियाणामधीशस्त्वंचैतन्यंत्वंहिदेहिनाम् २२ सर्वचेष्टानि-
मित्तस्त्वंरविर्वत्वंनकर्मभाक् त्वमीशोविश्वकर्तास्त्वंमहेशस्त्वंचनिस्पृहः २३ अतवर्ण्यहितवैश्वर्यंश्रुतयोभवतोगिरः स्वर्गद-
मोक्षदकर्मतच्चवेदेप्रतिष्ठितं २४ सचवेदस्त्वदन्योनोतस्मात्सर्वत्वयिस्थितं चतुर्विंशतितत्वानिपुरुषःपंचविंशकः २५ उ
दासीनश्चेतयितासत्वमेवनचान्यथा त्वयिदेवनिगद्यंतेभुवनानिचतुर्दश २६ निवसंतिचयेतत्रतत्सर्वत्वद्विभूतयः भग-
वन्नेकएवत्वं नहितीयोस्तिकश्चन २७ इतिनेनस्तुतोदेवस्तद्भक्त्याचतुतोषसः ददौगणत्वमतुलंतस्मैनित्यात्मसन्निधौ
२८ द्विजइतिसपरंपदप्रयानोथदगमनीयमहोत्तमोभिरुग्रैः शुचिसवनमघापहंविधायद्युमणिसुतासलिलेमुनींद्रजुष्टैः
२९ इतिसकलमलापहंपरंयोनरइतिहासमिमंशृणोतिचैव सवनमघहरंशुचौतपस्यविदधदसौलभतेकिलात्रचेष्टम्
३० इतिश्रीस्कंदपुराणेआषाढमाहात्म्येस्कंदईश्वरसंवादे एकोनत्रिंशोऽध्यायः २९ ५ इतिश्रीव्यंकटरामात्म-
जहरिकृष्णविरचितबृहज्ज्योतिषार्णवेअष्टमधर्मस्कंधेचतुर्थमासमाहात्म्यस्तबके आषाढमासमाहात्म्यकथननामचतुर्थमा
हात्म्यंसंपूर्णम् ४ श्रीगोपालकृष्णोजयति श्रीसीतारामचंद्रार्पणमस्तु श्रीरस्तु-

मुंबईमें पं० श्रीधरशिवलालसलेमादादकेइनोके ज्ञानसागर छापखानामें छापकर प्रसिद्धकिया. सं० १९४४ श-१८०९ मि० फाल्गुनशु० ७


इतिश्रीमासस्तवकेआषाढमाहात्म्यंसमाप्तं